कविकुलगुरू - कालिदास - संस्कृत - विश्वविद्यालयः

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

१०२

पु०८ ६

॥ मुद्राराक्षसंनाम नाटकं ॥

Checked 2012

Acc. No. ~~844~~ M.1752
Title - मुद्राराक्षसम्
Author - विशाखदत्त.
Date - ?
Subject - नाटक (Drama)
folio - 76 (folio No. 2 missing)
Xerox - 149

KKSU LIBRARY
RAMTEK
441 106
M-1752
Dist. Nagpur

॥श्रीगणेशायनमः॥श्रीमत्कालिकायैनमः॥धन्याकेयंस्थितातेशिरसिशशिकलाकिं
नुनामैतदस्यानामैवास्यास्तदेतत्परिचितमपितेविस्मृतंकस्यहेतोः॥नारीपृच्छामिनेंदुंक
थयतुविजयानप्रमाणंयदींदुर्देव्यानिह्नोतुमिच्छोरितिसुरसरितंशाठ्यमव्याद्विभोर्वः
॥१॥अपिच॥पादस्याविर्भवंतीमवनतिमवनेरक्षतःस्वैरपातैःसंकोचेनैवदोष्णांमुहुरभि
नयतःसर्वलोकातिगानां॥दृष्टिंलक्ष्येषुनोग्रांज्वलनकणमुचंबध्नतोदाहभीतेरित्याधारा
नुरोधात्त्रिपुरविजयिनःपातुवोदुःखनृत्यं॥२॥नांद्यंतेसूत्रधारः॥अलमतिविस्तरेणप्रसं
गेन।आज्ञापितोस्मिपरिषदा।यथाद्यत्वयासामंतवटेश्वरदत्तपौत्रस्यमहाराजपृथुसूनोः १

तुमिछतिबलादित्यर्द्धोक्ते। नेपथ्ये। आः कएषमयिस्थितेचंद्रगुप्तमभिभवितुमिछति। सूत्र०। र
क्षत्येनंतुबुधयोगः॥६॥ नटी। अज्जकोएसोधरणिगोअरोभविअचंदंगहाभियोगादोरक्खिदु
मिछदि। सूत्र०। यत्सत्यंमयापिनोलक्षितः। भवतुभूयोपियुक्तःस्वरव्यक्तिमुपलप्स्ये। पुनस्तदे
वक्रूरग्रहइत्यादिपठति। पुनर्नेपथ्ये। आः कएषमयिस्थितेचंद्रगुप्तमभिभवितुमिछति। सूत्र०।
आकर्ण्य। आर्यज्ञातं। कौटिल्यः। नटी। भयंनाटयति। सूत्र०। कौटिल्यःकुटिलमतिःसएषयेन
क्रोधाग्नौप्रसभमदाहिनंदवंशः॥ चंद्रस्यग्रहणमितिश्रुतेसनाम्नोमौर्येंदोर्द्विषदभियोगइ
त्यवैति॥७॥ नटी। भयंनाटयति। सूत्र०। तदितआवांगच्छावइतिनिष्क्रांतौ। प्रस्तावना॥ ॥ततः
प्रविशतिमुक्तांशिखांपरामृशन्सक्रोधश्चाणक्यः२। आः कथयकथयकएषमयिस्थितेचंद्र

गुप्तमभिभवितुमिच्छति। नंदकुलकालभुजंगी कोपानलबहलनीलधूमलतां॥ अद्यापि बध्य
मानां बध्यः को न इच्छति शिखां मे॥ १०॥ अपि च। उल्लंघयन्मम समुज्ज्वलतः प्रतापं कोपस्य नंदकुल
काननधूमकेतोः॥ सद्यः परात्मपरिमाण विवेकमूढः कः शालभेन विधिना लभतां विनाशं॥ ११॥
शार्ङ्गरवे॥ प्रविश्य शिष्यः। उपाध्याय आज्ञापय। चाणक्यः। वत्स उपवेष्टुमिच्छामि। शिष्यः। नन्वि
यं सन्निहितवेत्रासनैव द्वारप्रकोष्ठशाला तदस्यामुपवेष्टुमर्हत्युपाध्यायः। चाणक्यः। वत्स कार्या
भियोग एवास्मानाकुलयति न पुनरुपाध्यायसहभूः शिष्यजने दुःशीलता॥ नाट्येनोपविश्य।
आत्मगतं। कथं प्रकाशंगतोयमर्थः पोरेषु। यथा किल नंदकुलविनाशजनितरोषो राक्षसः पि
तृवधामर्षितेन सकलनंदकुलराज्यपरिपणप्रोत्साहितेन पर्वतकपुत्रेण मलयकेतुना सह

३

4

संधायतदुपगृहीतेनचमहताम्लेछराजबलेनपरिवृतोवृषलमभियोक्तुमुद्यतइति।विचिं
त्य।अथवायेनमयासर्वलोकप्रकाशंनंदवंशवधंप्रतिज्ञायनिस्तीर्णादुस्तराप्रतिज्ञासरित्सो
हमिदानींप्रकाशीभवंतमप्येनमर्थंकिंनसमर्थःप्रशमयितुं।कुतएव।यस्यमम।श्यामीकृत्या
नेनेंदूनरिपुवतिदिशांसंततैःशोकधूमैःकामंमंत्रिद्रुमेभ्योनयपवनहतंमोहभस्मप्रकीर्य।
दग्ध्वासंभ्रांतपौरद्विजगणरहितान्नंदवंशप्ररोहान्दाह्याभावान्नखेदाज्ज्वलनइववनेशा
म्यतिक्रोधवह्निः॥१०॥अपिच॥शोचंतोवनतैर्नराधिपभियाधिक्शब्दगर्भैर्मुखैर्मामयासन
तोवकृष्टमवशंयेदृष्टवंतःपुरा॥तेपश्यंतुतथैवसंप्रतिजनानंदंमयासान्वयंसिंहेनेवगजेंद्र
मद्रिशिखरात्सिंहासनात्पातितं॥११॥सोहमिदानीमवसितप्रतिज्ञाभारोपिवृषलापेक्षया

शस्त्रंधारयामि।येनमया॥समुत्खातानंदानवहृदयशल्याइवभुवःकृतामौर्येलक्ष्मीःसरसिबि
सिनीवस्थिरपदा॥द्वयोःसारंतुल्यंद्वितयमभियुक्तेनमनसाफलंकोपप्रीत्योर्द्विषतिचविभक्तं
सुहृदिच॥१२॥अथवाऽगृहीतेराक्षसेकिमुत्खातेनंदवंशस्यकिंवास्थैर्यमुत्पादितंचंद्रगुप्तल
क्ष्म्याः।विचिंत्य।अहोराक्षसस्यनंदवंशेनिरतिशयोभक्तिगुणः।सखलुकस्मिंश्चिदपिनंदान्वया
वयवेजीवतिवृषलस्यसाचिव्यंग्राहयितुंनशक्यतेऽतस्तदभियोगंप्रतिनिरुद्योगैरवस्थातुंन
युक्तमित्यस्माभिरनयैवबुद्ध्यातपोवनगतोपिघातितस्तपस्वीनंदवंशीयःसर्वार्थसिद्धिः।या
वदसौमलयकेतुमूरीकृत्यविपुलतरंप्रपंचमुपदर्शयत्येवास्मदुच्छेदाय।प्रत्यक्षवदाकाशे
लक्ष्यंबध्वा।साध्वमात्यराक्षससाधुमंत्रश्रोत्रियसाधु।साधुमंत्रिबृहस्पतेसाधु।कुतः॥ऐश्वर्या ४



दनपेतमीश्वरमयंलोकोर्थतःसेवतेतंगछंत्यनुयेविपत्तिषुपुनस्तेतत्प्रतिष्ठाशया॥भर्तुर्येप्रल
येपिपूर्वसुकृतासंगेननिःसंगयाभक्त्याकार्यधुरंवहंतिकृतिनस्तेदुर्लभास्त्वादृशाः॥१३॥अ
तएवास्माकंत्वत्संग्रहणेप्रयत्नः कथमसौवृषलस्यसाचिव्यग्रहणेनसानुग्रहःस्यात्।कुतः॥प्र
प्राज्ञेनचकातरेणचगुणःस्यात्सानुरागेणकः प्रज्ञाविक्रमशालिनोपिहिभवेत्किंभक्तिहीनात्फ
लं॥प्रज्ञाविक्रमभक्तयःसमुदितायेषांगुणाभूतयेतेभृत्यानृपतेःकलत्रमितरेसंपत्सुचापत्सु
च॥१४॥तन्मयाप्यस्मिन्वस्तुनिनशयानेनस्थीयतेयथाशक्तिक्रियतेतत्संग्रहणंप्रतियत्नः।कथ
मिति।तत्रतावद्वृषलपर्वतकयोरन्यतरविनाशेनापिचाणक्यस्यापकृतंभवतीतिविषकन्यया
राक्षसेनास्माकमत्यंतोपकारिमित्रंघातितस्तपस्वीपर्वतेश्वरइतिसंचारितोऽजनापवादः।लोक जगति

कृत्ययार्थमस्यैवार्थस्याभिव्यक्तयेपितातेचाणक्येनघातितइतिरहसित्रासयित्वाभागुरायणे
नापवाहितःपर्वतकपुत्रोमलयकेतुः।शक्यःखल्वयंराक्षसमतिपरिगृहीतोपिव्युत्तिष्ठमानः
प्रज्ञयानिवारयितुं।नपुनरस्यनिग्रहात्पर्वतकवधोत्पन्नमयशःप्रकाशीभवत्प्रमार्ष्टुमलमिति।
अन्यच्च।प्रयुक्ताःस्वपक्षपरपक्षयोरनुरक्तापरक्तजनजिज्ञासयाबहुविधदेशवेषभाषासं
चारवेदिनोनानाव्यंजनाःप्रणिधयः।अन्विष्यंतेचकुसुमपुरनिवासिनांनंदामात्यसुहृदांनि
पुणप्रचारगतयः।तत्तत्कारणमुत्पाद्यकृतकृत्यतामापादिताश्चंद्रगुप्तसहोत्थायिनोभद्रभट
प्रभृतयःप्रधानपुरुषाः।शत्रुप्रयुक्तानांचतीक्ष्णरसदायिनांप्रतिविधानंप्रत्यप्रमादिनःपरी ५
क्षितगुणभक्तयःक्षितिपतिप्रत्यासन्नानियुक्तास्तत्राप्तपुरुषाः।अस्तिचास्माकंसहाध्यायिमि

त्रमिंदुशर्मानामब्राह्मणःसचौशनस्यांदंडनीतौचतुःषष्ट्यंगेज्योतिःशास्त्रेचपरंप्रावीण्यमु
पगतः।सचमयानंदवंशवधप्रतिज्ञासमनंतरमेवक्षपणकलिंगधारीकुसुमपुरमुपनीयनं
दामात्यैःसहसख्यंग्राहितः।विशेषतश्चतस्मिन्राक्षसःसमुत्पन्नविश्रंभस्तेनेदानीमहत्प्रयो
जनमनुष्ठेयंभविष्यति।तदेवमस्मत्तोनकिंचित्परिहास्यते।वृषलएवकेवलंप्रधानप्रकृतिष्व
स्मास्वारोपितराज्यभारःसततमुदास्ते।अथवायत्स्वयमभियोगदुःखैरसाधारणैरपाकृतंतत
देवराज्यंसुखयति।कुतः।स्वयमाहृत्यभुंजानाबलिनोपिस्वभावतः॥नरेंद्राश्चमृगेंद्राश्चप्रायः
सीदंतिदुःखिताः॥१५॥ततःप्रविशतिसहयमपटेनचरः२।पणमहजमस्सचलणेकिंकज्जं
देवएहिं अणेहिं॥एसोक्खुअणभत्ताणहणइजीअंतडफडंतं॥१६॥अविज्ञ।पुरिसस्सजी

विदह्वं विसमादो होइ भत्तिगहिआदो ॥ माल्लेइ सव्वलोअं जो तेण जमेण जीआमो ॥१७॥ जाव
एदं गेहं पविसिअ जमपडं दंसअंतो गीआइं गाआमि इति परिक्रामति ॥ पाउणणिरवसेसं कुसु
मरसं अत्तणो कुसलदाए ॥ जं उग्गिरेइ भमरो तं अग्गाणं कुणइ कज्जं ॥१८॥ शिष्यः । विलोक्य ।
भद्र न प्रवेष्टव्यं । २ चरः । हंहो बम्हणा कस्स केरं एदं गेहं । शिष्यः । अस्माकमुपाध्यायस्य सुगृ
हीतनाम्न आर्यचाणक्यस्य । चरः । विहस्य । हंहो बम्हणा अत्तणो केरकस्स ज्जेव धम्मभादुणो घ
रं भो दिताद हि मे पवेसं जाव दे उवज्झाअस्स धम्मं उवदिसामि । शिष्यः । सक्रोधं । अरे मूर्ख किं भ
वानस्मदुपाध्यायादपि धर्मवित्तरः । चरः । हंहो बम्हणा मा कुप्प २ ण हि सव्वो सव्वं जाणादि । तादि
विदे उवज्झाओ जाणादि किं पि अम्हारिसा जणा जाणंदि । शिष्यः । आः सर्वज्ञतामुपाध्यायस्य

६

बोरयितुमिछसि। चरः। हंहो बम्हणा जइ तुअउवज्झाओ सव्वं जाणादि ता जाणादु दाव कस्स चं
दो अणभिप्पेदो त्ति। शिष्यः। मूर्ख गुरोः किमनेन ज्ञातेन भवति। चरः। हंहो बम्हणा तुह उवज्झाओ
सव्वं जाणिस्सदि जं इमिणा जाणिदेण होदि। तुमं दाव एत्तिअं जाणासि कमलाणं चंदो अणभिप्पे
वि दो त्ति। णं पेक्ख। कमलाणँ मणहराणँ रूवाहिं तोवि संवदइ सीलं॥ संपुणमंडलम्मि वि जाइं चंदे वि
रुद्धाइं॥१७॥ चाण०। आकर्ण्यात्मगतं। अये चंद्रगुप्तापरक्तान्पुरुषाञ्जानामीत्युपक्षिप्तमनेन। शि
ष्यः। मूर्ख किमिदमसंबद्धमिवाभिधीयते। चरः। हंहो बम्हणा तं सुसंबद्धं जेव्व एदं भवे। शिष्यः। य
दि किं स्याद्। चरः। जइ सुणिदं जाणंतं जणं उवलहे। चाण०। भद्र विस्रालप्स्यसे श्रोतारं ज्ञातारं च। च
रः। एसो पविसामि। प्रविश्योपसृत्य। जअदु अज्जो। चाण०। विलोक्यात्मगतं। बहुप्रबंधखलाकार्या

णां नियतं पुरजनपरिज्ञान नियुक्तो निपुणक इति विज्ञायते। स्मृतिमभिनीय। अये कथं प्रकृतिचि
त्तपरिज्ञाने नियुक्तो निपुणकः। प्रकाशं। भद्र स्वागतमुपविश्यतां। चरः। जं अज्जो आणवेदित्ति भू
मावुपविशति। चाण०। भद्र वर्णयेदानीं स्वनियोगवृत्तांतं। अपि वृषलमनुरक्ताः प्रकृतयः। चरः।
अज्ज अध इं। अज्जेण क्खु तेसु तेसु विराअकारणेसु परिहरिदेसु सुगहिदणामहेअं चंदउत्तं दि
ढमणुरत्ता [illegible] पकिदीओ। किं उण एत्थ ण अरेअमच्च रक्खसेण सह पढमसमुप्पण्णसिणेहमणुव
ट्टमाणा तिण्णि पुरिसा जे देवस्स चंदउत्तस्स सिरिं ण सहंदि। चाण०। सक्रोधं। नन्वेवं वक्तव्यं स्वजीवि
तं न सहंत इति। भद्र अपि विज्ञायंते नामधेयतः। चरः। कधं अन्नु णिअणामहेआ अज्जस्स णिवे
दीअंति। चाण०। तेन हि नाम श्रोतुमिच्छामि। चरः। सुणादु अज्जो। पढमं दाव अज्जस्स रिउवक्खे

वद्धपक्खवादोखवणओ।चाण०।सहर्षमात्मगतं।अस्मद्विपुपक्षेवद्धपक्षपातःक्षपणकः।
प्रकाशं।किंनामधेयोहिसः।चरः।जीअसिद्धीणाम।चाण०।अस्मद्विपुपक्षेवद्धपक्षपातइति
कथमवगतंभवता।चरः।जेणसाअमच्चरक्खसप्पउत्ताविसकण्णआदेवेपव्वदीसरेसमावेसिदा।
चाण०।आत्मगतं।जीवसिद्धिःसतावदस्मत्प्रणिधिः।प्रकाशं।भद्रअथापरःकः।चरः।अज्जअ
वरोविअमच्चरक्खसस्सपिअवअस्सोकाअत्थोसअडदासोणाम।चाण०।विहस्यात्मगतं।का
यस्थइतिलघ्वीमात्रातथापिनयुक्तंप्राकृतमपिरिपुमवज्ञातुं।तस्मिन्मयासुहृच्छद्मनासिद्धा
र्थकोनिक्षिप्तः।प्रकाशं।भद्रतृतीयमपिश्रोतुमिच्छामि।चरः।तिदीओविअमच्चरक्खसस्सदु
दीअंविअहिअअंपुप्फउरणिवासीमणिआरसेट्ठीचंदणदासोणामजस्सगेहेकलत्तंणासी।

13



रकवसो कदुअंणअरादो अवक्कंतो। चाण॰। स्वगतं। नूनं सुहृत्तमः नह्यनात्मसदृशेषु राक्षसः कलत्रंन्या
सीकरिष्यति। प्रकाशं। भद्र चंदनदासस्य गृहे राक्षसेन कलत्रंन्यासीकृतमिति कथमवगम्यते भ
वता। चरः। इअंअंगुलिमुद्दा अज्जं अवगदत्थे केरिस्सादि। इति मुद्रामर्पयति। चाण॰। मुद्रामवलोक्य
गृहीत्वा वाचयति नाम राक्षसस्य। सहर्षं। स्वगतं। ननु वक्तव्यं राक्षस एवास्मदंगुलिप्रणयी संवृत्त
इति। प्रकाशं। भद्र अंगुलिमुद्राधिगमं विस्तरेण श्रोतुमिच्छामि। चरः। सुणादु अज्जो अत्थि दाव अ
हं अज्जेण पउरजणचरिदं अण्णेसणे णिउत्तो। तदो परघरपवेसे परस्स अजणासंकणीएण इमिणा ज ८
मपडेण हिंडंतो अज्जमणिआरसेट्ठिचंदणदासस्स गेहं पविट्ठोम्हि। तहिं जमपडं पसारिअ पउ
त्तोम्हि गाइदुं। चाण॰। ततः किं। चरः। तदो एक्को ओवरकादो पंचवरिसदेसीओ पिअदंसणीअस



॰कदे वाल जणलुलहकोदूहलुप्फुल्लणअणज्जुअलो कुमारओ णिक्कमिदुं पउत्तो। त
॰हा णिग्गदो णिग्गदो त्ति संकापरिगदगरुओ तस्स ज्जेव्व ओवरकस्स अब्भंतरे महंतो कोला
हलो उच्छलिदो दुइली अणस्स। तदो ईसिदुआरदेसवारिवादमुही एएक्काए इत्थिआए सो कुमार
ओ णिक्कमंतो ज्जेव्व णिअच्छिअअवलंबिदो करेण कोमलाए बाहुलदिआए। तिस्सा कुमारसं
रोधसंभमचलिदंगुलीआदो कराहो पुरिसंगुलीपरिणाहप्पमाणघडिदा इदो ज्जेव्व विअलि मुद्दिआ
पादेहलिवट्टे णिवडिअउच्छलिदा ताए अप्पाववुद्धज्जेव्व मम चलणसआसं आअच्छिअप
॰मा णिउज्जआकुलवहूविअ णिच्चलासंवुत्ता। मए विअ मच्चरकूव सस्सणा मं किदं त्ति दत्थेकदु
॰अज्जस्स पादमूलं पाविदा। ता एसो इमाए मुद्दिआए आगमो त्ति। चाण०। भद्द श्रुतमपसं

नचिरादस्यपरिश्रमस्यानुरूपंफलमधिगमिष्यसि।चरः।जंअज्जोआणवेदित्तिनिष्क्रां
ः।चाण०।शाङ्ग-रव२प्रविश्यशिष्यः।आर्यआज्ञापय।चाण०।वत्समषीभाजनंपत्रंचोपनय।
शिष्यः।यदाज्ञापयत्युपाध्यायइतिनिष्क्रम्यपुनःप्रविश्य।उपाध्यायइदंमषीभाजनंपत्रंच।
चाण०।गृहीत्वास्वगतं।।किमत्रैलिखामि।अनेनखलुलेखे नमयाराक्षसोजेतव्यः।प्रविश्य
प्रतीहारी।जअदु२अज्जो।चाण०।सहर्षमात्मगतं।गृहीतोयंजयशब्दः।प्रकाशं।शोणोत्त
रेकिंप्रयोजनमागमनस्य।प्रती०।अज्जोकमलमउलाआरंअंजलिंसीसेणिवेसिअदेवो
ंदसिरीअज्जंविणवेदि।इच्छामिअहंअज्जेणअणुण्णादोदेवस्सपव्वदीसरस्सपारलोइ
टंतेणधारिदपुव्वाइंभूसणाइंपत्तेअवंताणंबम्हणाणंपडिवादेमित्ति।चाण०।सहर्षं

१

16

मात्मगतं।साधु वृषल साधु ममैव हृदयेन सह संमंत्र्य संदिष्टवानसि।प्रकाशं।शोणोत्तरे उच्य
तामस्मद्वचना वृषलः।साधु वत्स साधु अभिज्ञः खल्वसि लोकव्यवहाराणां।तदनुष्ठीयतामा
त्मनोभिप्रायः।किंतु पर्वतेश्वरेण धृतपूर्वाणि गुणवंति भूषणानि गुणवद्भ्य एव ब्राह्मणेभ्यः
प्रतिपादनीयानि।तदेष स्वयंपरीक्षितगुणान्ब्राह्मणान्प्रेषयामि।प्रती०।जं अज्जो आणवेदि
त्ति निष्क्रांता।चाण०।शार्ङ्गरव २ प्रविश्य शिष्यः।उपाध्याय आज्ञापय।चाण०।उच्यंतामस्मद्वच
नाद्विश्वावसुप्रभृतयस्त्रयो भ्रातरः वृषलात्प्रतिगृह्याभरणानि भवद्भिरहं द्रष्टव्य इति।शि
ष्यः।यदाज्ञापयत्युपाध्याय इति निष्क्रांतः।चाण०।स्वगतं।उत्तरोयं लेखार्थः।पूर्वः कतमोस्तु।
विचिंत्य।आं ज्ञातं।उपलब्धवानस्मि प्रणिधिभ्यः यथा तस्य म्लेछराजबलस्य प्रधानतमाः पं

17

राजानः परमया सुहृत्तया राक्षसमनुवर्त्तंत इति। तद्यथा॥ कौलूतश्चित्रवर्मा मलयनरपतिः
सिंहनादो नृसिंहः काश्मीरः पुष्कराक्षः क्षतरिपुमहिमा सैंधवः सिंधुसेनः॥ मेघाक्षः पंचमोस्मि
न्पृथुतुरगबलः पारसीकाधिराजो नामान्येषां लिखां ध्रुवमहमधुना चित्रगुप्तः प्रमार्ष्टु॥२०॥ मि
अथवा न लिखामि सर्वमनभिव्यक्तमास्तां तावत्। शार्ङ्ग॰रव२ प्रविश्य शिष्यः। उपाध्याय आज्ञापय।
चा॰ वत्स श्रोत्रियजनलिखिताक्षरमालिका प्रयत्नरचितापि नियतमस्फुटा भवति तदुच्यतामस्म
द्वचनात्सिद्धार्थकः एभिरक्षरैः कस्यापि किमपि शकटदासेन स्वयं वाच्यमिति न चाख्येयमस्मै
यथा चाणक्यो लेखयतीति। शिष्यः। यदाज्ञापयत्युपाध्याय इति निष्क्रांतः। चाण॰ हंत स्वगतं जि १०
तोयं मलयकेतुः। प्रविश्य लेखहस्तः सिद्धार्थकः। जअदु२ अज्जो। अज्ज सअडदासेण अं



।ल। हद्धाले होमवज्जणेण अविचालिआ। चाण॰। गृहीत्वाऽवलोक्य च। अहो दर्शनीयान्यक्षरा
णि। अनुभाव्य भद्र अनयामुद्रयैनं मुद्रय। सिद्धार्थ॰। जं अज्जो आणवेदित्ति तथा कृत्वा। अज्ज
मुद्दिओ लेहो आणवेदु अज्जो किं अवरं अणुचिट्ठिदव्वं इमिणा दासजणेण। चाण॰। भद्र त्वां क
स्मिंश्चिदाप्तजनानुष्ठेये नियोक्तुमिच्छामि। सिद्धा॰। सहर्षं। अज्ज अणुगहिदोम्हि। ता आणवेदु
अज्जो किं अवरं अणुचिट्ठिदव्वं इमिणा दासजणेण। चाण॰। प्रथमं तावद्वध्यस्थानं गत्वा घातकाः
सरोषं दक्षिणाक्षि संज्ञां ग्राहयितव्याः। ततस्तेषु गृहीतसंज्ञेषु भयादितस्ततः प्रद्रुतेषु वध्यस्था
नादपवाह्य शकटदासो राक्षसं ग्राहयितव्यः। तस्मात्तु हृत्प्राणरक्षणतुष्टात्पारितोषिकं ग्राह्यं।
गृहीत्वा च राक्षस एव कंचित्कालांतरं सेवितव्यः। ततः प्रत्यासन्नेषु परेषु प्रयोजनमिदमनुष्ठेयं।

कर्णएवमेतद्देवेतिकथयति।सिद्धार्थकः।जंअज्जोआणवेदि।चाण०।शार्ङ्गरव२प्रविश्यशिष्यः।
आज्ञापय।चाण०।उच्यतामस्मद्वचनात्कालपाशिकोदंडपाशिकश्च।यथावृषलोयुवामाज्ञा
पयतिएषक्षपणकोजीवसिद्धीराक्षसप्रयुक्तोविषकन्ययापर्वतेश्वरंघातितवान्सएनमेवदो
षंप्रख्याप्यसनिकारंनगरान्निर्वास्यतामिति।शिष्यः।यदाज्ञापयत्युपाध्यायइतिनिष्क्रामति।
चाण०।योयमपरःकायस्थःशकटदासोनामराक्षसप्रयुक्तोनित्यमस्मच्छरीरमभिद्रोग्धुमभि
वर्त्ततेसएवमेवदोषंप्रख्याप्यशूलमारोप्यतामिति।गृहजनश्चास्यबंधनागारंप्रवेश्यतामिति। ११
शिष्यः।यदाज्ञापयत्युपाध्यायइतिनिष्क्रांतः।चाण०।चिंतांनाटयति।आत्मगतं।अपिनामदुरा
राक्षसोगृह्येत।सिद्धा०।गहिदो।चाण०।सहर्षमात्मगतं।हंतगृहीतोराक्षसः।प्रकाशं।भ

द्रकोयंगृहीतः।।सिद्धा०।अज्जगाहिदोमए।अज्जसंदेसोतागमिस्सं।अहंकुज्जसिद्धीए।चा०।
सांगुलिमुद्रंलेखमर्पयित्वाभद्रगम्यतामस्तुतेकार्यसिद्धिः।सिद्धा०।जंअज्जोआणवेदित्तिप
रिक्रम्यनिष्क्रांतः।प्रविश्यशिष्यः।आर्यअयंकालपाशिकोदंडपाशिकश्चार्यंविज्ञापयतःइद
मनुष्ठीयतेदेवस्यचंद्रगुप्तस्यशासनमिति।चा०।वत्सशोभनमधुनामणिकारश्रेष्ठिनंचंदनदा
संद्रष्टुमिच्छामि।शिष्यः।यदाज्ञापयत्युपाध्यायइतिनिष्क्रम्यचंदनदासेनसहपुनःप्रविश्य।इत
इतश्चंदनदासश्रेष्ठिन्।चंद०।आत्मगतं।चाणक्कम्मिअकरुणेसहसासद्दाविअस्सवहुइ।।णि
द्दोसस्सविसंका।किंउणसंजाददोसस्स।।२१।।ताब्भणिदामए।धणसेणप्पमुहातिणिसेट्ठिआ
जधाकदाविचाणक्कहदओगेहंपिविआरेदिताअववाहेधअमच्चरक्खसस्सपरिअणंमम

दाणिंजंभोदितंभोदुत्ति।शिष्यः।इतइतःश्रेष्ठिन्चंदनदास।चंद०।अअंआअच्छामि।उभोपरिक्का

उपसृत्य। मतः।शिष्यः।उपाध्यायश्रेष्ठीचंदनदासः।चं०।जेअदु२अज्जो।चा०।नाट्येनावलोक्य।भोःश्रेष्ठि

न्स्वागतमिदमासनमास्यतां।चंद०।प्रणम्य।किंणजाणादिजेवअज्जोजधाअणुचिदोपआरो

परिहवादो सोहिअस्समहंतंदुःखमुप्पादेदि।ताइधज्जेवअहंउचिदाएभूमीएउवविसामि।चा०।भोःश्रेष्ठि

न्नैवंउचितमेवास्मद्विधैःसहभवतःसमासनंतदुपविश्यतामासनएव।चंद०।आत्मगतं।उव

लक्खिदंकिंविअणेण।प्रकाशं।जंअज्जोआणवेदित्तिउपविष्टः।चा०।भोःश्रेष्ठिन्नुपचीयंतेसं

व्यवहाराणांवृद्धिलाभाः।चंद०।अज्जअधइं।अज्जस्सपसाएणअखंडिआमेवणिज्जा।चा०।

भोःश्रेष्ठिन्नअपिचंद्रगुप्तदोषाअतिक्रांतपार्थिवगुणाननुस्मारयंतिप्रकृतीः।श्रेष्ठी।कणौ



पिधाय।अज्जसंतंपावं।२सरअणिसासमुग्गएणविअपुण्णमासीचंदेणचंदसिरिणा।अधिअ
दरंणंदंतिपाकिदीओ।चा०।भोःश्रेष्ठिन्नूयद्येवंप्रीताभ्यःप्रकृतिभ्यःप्रियमिछंतिराजानः।चंद०।आ
णवेदुअज्जोकिंकेत्तिअंइमादोजणादोअत्थजादंइच्छीअदि।चाण०।भोःश्रेष्ठिन्नूचंद्रगुप्तराज्य
मिदंननंदराज्यं।यतोनंदस्यैवार्थरुचेरर्थसंबंधःप्रीतिमुत्पादयति।चंद्रगुप्तराज्येतुभवतामप
रिक्लेशएव।श्रेष्ठी।सहर्षं।अज्जअणुगहिदोम्हि।चा०।भोःश्रेष्ठिन्नूसचायमपरिक्लेशःकथमा
विर्भवतीतिननुप्रष्टव्यावयंभवता।श्रेष्ठी।आणवेदुअज्जो।चाण०।संक्षेपतोराजन्यविरुद्धाभिः
प्रकृतिभिः।चंद०।अधकोअधम्मोजोरण्णासहविरुद्धोत्तिअज्जेणअवगच्छीअदि।चाण०।प्र
वानेवतावत्प्रथमः।चंद०।कर्णौपिधाय।संतंपावं।२कीदिसोउणतिणाणंअग्गिणासहविरोधो।

चा॰ अयमीदृशोविरोधः यत्त्वमद्यापिराजापथ्यकारिणोराक्षसस्यगृहजनंस्वगृहमुपनीय
रक्षसि। चंद॰ अलिअंएदंकेणविअणज्जेणअज्जस्सणिवेदिदं। चा॰ श्रेष्ठिन्नलमाशंकया। भी
ताराजपुरुषाः पोराणामनिछतामपिगृहेगृहजनंपरिक्षिप्यदेशांतरंव्रजंति। ततस्तत्प्रछादन
मेवदोषमुत्पादयति। चंद॰ एव्वंणेदं। तस्सिंसमए आसिअह्मघरेअमच्चरक्खसस्सघरअणो।
चा॰ प्रथममनृतमिदानीमासीदितिपरस्परविरोधिनीवचने। चंद॰ अज्जएत्थंतरेमेवाअछ
लंअत्थि। चा॰ भोः श्रेष्ठिन्चंद्रगुप्तराज्येऽपरिग्रहछलाजनास्तत्समर्पयराक्षसस्यपरिजन
मछलंखलुभवतः। चंद॰ अज्जणंविण्णवेमितस्सिंसमए आसिअह्मघरेअमच्चरक्खस
स्सघरअणोत्ति। चा॰ अथेदानींक्वगतः। चंद॰ णआणामिकहिंगदोत्ति। चाण॰ स्मितंकृत्वा।

कथंनज्ञायतेनामश्रेष्ठिभिः।शिरसिफणिनंनिधायदूरेतत्प्रतीकारः।अन्यच्च।नंदमिवचंद्रगुप्त
मित्यर्द्धोक्तेनंदमिवविलुगुप्तश्चंद्रगुप्तममात्यराक्षसःसमुत्सारयतीतिमैवंप्रपद्येथाः।पश्य॥
विक्रांतैर्नयशालिभिःसुसचिवैःश्रीर्वक्रनासादिभिर्नंदेजीवतिसान्वयेनगमितास्थैर्यंचलंती
मुहुः॥तामेकत्वमुपागतांद्युतिमिवप्रह्लादयंतीजगत्कश्चंद्रादिवचंद्रगुप्तनृपतेःकर्त्तुंव्यवस्येत्पृ
थक्॥२२॥अपिच॥आस्वादितद्विरदशोणितशोणशोभांसंध्यारुणामिवकलांशशालांछ
नस्य॥जृंभाविदारितमुखस्यमुखात्स्फुरंतीकोहर्तुमिच्छतिहरेःपरिभूयदंष्ट्रां॥२३॥श्रेष्ठी।स्वगतं।
फलेणसंवादिदंसोहइश्चिअल्हिदं।ततोनेपथ्येसनिकारवाद्यमुत्सारणाक्रियते।चाण।शार्ङ्गर
वज्ञायतांकिमेतदिति।शिष्यः।यदाज्ञापयत्युपाध्यायइतिनिष्क्रम्यपुनःप्रविश्य।उपाध्यायए

25

पृदेवस्यचंद्रगुप्तस्याज्ञयाराजापथ्यकारीक्षपणकोजीवसिद्धिःसनिकारवाद्यंनगराद्बहिर्नि
र्वास्यते।चा०।अहह।अथवास्वकर्मभिरभिभवतुराजापथ्यकारित्वस्यफलं।भोःश्रेष्ठिन्नेवम
पथ्यकारिणांतीक्ष्णदंडोराजातत्क्रियतांपथ्यंसुहृद्वचः।समर्प्यतांराक्षसस्यपरिजनः।अनुभू
यतांचित्रफलोराजप्रसादः।चंद०।अज्जगेहेअसंतंकुदोसमप्पीअदि।ततोनेपथ्येपुनरुत्सा
रणाक्रियते।चाण०।शार्ङ्गरव२पुनर्ज्ञायतांकिमेतदिति।शिष्यः।यदाज्ञापयत्युपाध्यायइति
निष्क्रम्यपुनःप्रविश्य।एषराजापथ्यकारीकायस्थःशकटदासःशूलमारोपयितुंनीयते।चा
ण०।स्वकर्मफलभाग्भवतु।भोःश्रेष्ठिन्चंदनदासएवमपथ्यकारिषुतीक्ष्णदंडोराजान
मर्षयिष्यतिराक्षसकलत्रप्रच्छादनंतद्रक्ष्यतांपरकलत्रेणात्मकलत्रंजीवितंधनंच।चं०

१४



अज्ज किं सन्तं दावे सि संतं पि अहं अमच्चरक्खसस्स घरअणं ण समप्पेमि किं उण असंतं।
चा०। चंदनदास एष ते निश्चयः। चं०। बाढं एसो थिरो मे णिच्चओ। चा०। आत्मगतं। साधु चंदन
दास साधु॥ सुलभेष्वर्थलाभेषु परसंवेदने जने॥ क इदं दुष्करं कुर्यादिदानीं शिबिना विना॥२७॥
प्रकाशं। एष ते निश्चयः। चंद०। बाढं। चाण०। सक्रोधं। दुरात्मन् दुष्टवणिगनुभूयतां तर्हि राजको
पः। श्रेष्ठी। सज्जो म्हि अणुचिट्ठदु अज्जो अत्तणो अहिआरस्स अणुरूवं। चाण०। सक्रोधं।
शार्ङ्गरव रव उच्यतामस्मद्वचनात्कालपाशिको दंडपाशिकश्च शीघ्रमयं वणिक् शूलमारो
पयितुं गृह्यतां। अथवा तिष्ठ उच्यतामस्मद्वचनाद्दुर्गपालो विजयपालश्च गृहीतसारमेनं
सपुत्रकलत्रं संयम्य रक्ष्यतां तावद्यावन्मया वृषलाय कथ्यते। वृषल एवास्य प्राणहरणं

दंडमाज्ञापयिष्यति। शिष्यः। यदाज्ञापयत्युपाध्यायः। इत इतः श्रेष्ठिन्चंदनदास। चं०। उत्थाय।अ
यमागच्छामि। आत्मगतं। दिठ्ठिआमित्तकज्जेण विणासो जणिदो। परिक्रम्य शिष्येण सहनि
ष्क्रांतः। चा०। सहर्षं। हंत लब्धइदानीं राक्षसः। कुतः। त्यजत्यप्रियवत्प्राणान्यथा तस्यायमाप
दि॥ तथैवास्यापदि प्राणा ध्रुवं तस्यापि न प्रियाः॥ २५॥ नेपथ्ये कलकलः। प्रविश्य शिष्यः। ए
ष सिद्धार्थकः शकटदासं वध्यभूमेरादाय समपक्रांतः। चाण०। स्वगतं। साधु सिद्धार्थक सा
धु कृतः कार्यारंभः प्रव्रजतु कार्यसिद्धये। प्रकाशं। सक्रोधं। वत्स उच्यतामस्मद्वचनाद्दुष्
टपुरुषदत्तहिंगुरातबलगुप्तराजसेनरोहिताक्षविजयवर्माणः शीघ्रमनुसृत्य गृह्यतां
दुरात्मा शकटदासः। शिष्यः। यदाज्ञापयत्युपाध्याय इति निष्क्रम्य पुनः प्रविश्य। सविस्म

२५

28

यं।उपाध्यायहाधिक्षिप्तं२सर्वमेवाकुलीकृतंतेपिभद्रभटप्रभृतयःप्रथमतएवप्रभाता
यामेवरजन्यामपक्रांताः।चा०।स्वगतं।सर्वेषांशिवाःसंतुपंथानः।प्रकाशं।वत्सअलंविषा
देन।पश्य।।येयाताःकिमपिप्रधार्यहृदयेपूर्वंगताएवतेयेतिष्ठंतिभवंतुतेपिगमनेकामं
सकामोद्यताः।।एकाकेवलमेवसाधनविधौसेनाशतेभ्योधिकानंदोन्मूलनदृष्टवीर्यवि
भवाबुद्धिस्तुमागान्मम।।२६।।उत्थाय।एषदुरात्मनोभद्रभटप्रभृतीन्नयोहयामि।आत्म
गतं।प्रत्यक्षवदाकाशेलक्ष्यंबध्वा।दुरात्मन्राक्षसक्वयास्यसि।एषोहमचिराद्भवंतं।।स्वच्छं
दमेकचरमुज्वलदानशक्तिंप्रस्यंदिनाबलमदेनविगाह्यमानं।।बुद्ध्यानिगृह्यवृषलस्यकृ
तेक्रियायामारण्यकंगजमिवप्रगुणीकरोमि।।२७।।इतिनिष्क्रांताःसर्वेप्रथमोंकः।। ।।छ।।

ततःप्रविशत्याहितुंडिकः।आहि०।जाणंतितंतजुत्तिंजहट्ठिअंमंडुलं[illegible]हिलिहंति।।जेमंतरक्ख
णवरातेसप्पणराधिवेठवरखंति।।२८।।आकाशे।अज्जकिंभणासिकोतुमंति।अज्जअहंक्खु
आहितुंडिओ।जिणविसोणाम।किंभणासिअहंपिअहिणाखेलिदुमिच्छामित्ति।अधकदरंउण
वित्तिमुवजीआदिअज्जो।।किंभणासिराअकुलसेवकोम्हित्ति।ताणंखेलदिज्जेव्वअज्जोसप्पेहिं।क
धंविअ।अमंतोसहिकुसलोवालग्गाही अइप्पमत्तोमत्तगअवरारोहोलद्धाधिआरो।जिदकासी
राअकुलसेवकोत्तित्तिणोविएदेतदोज्जेव्वविणासमणुहवंति।कधंअदिक्कंतोएसो।पुनराकाशे।
अज्जतुमंउण।किंभणासिकिंएदेसुपेडासमुग्गएसुत्ति।अज्जजीविआसंपादआसप्पा।किंभणा
सिपेक्खिदुमिच्छामित्ति।पसीददु२अज्जोअत्थाणंक्खुएदंताजइदेकोदूहलंतापदिएदंगेहंपवि १६

30

सिअदं सेमि। किं भणासि एदं क्खु भट्टिणो अमच्चरक्खसस्स गेहं णत्थि अम्हारिसाणं एत्थ पवेसोत्ति।
तेण हि गच्छदु अज्जो मम उण जीविआपसाएण अत्थि एत्थ पवेसोत्ति। कधं एसो वि अदिक्कंतो। स
विस्मयमात्मगतं। संस्कृतमाश्रित्य। अहो आश्चर्यं २ चाणक्यमतिपरिगृहीतं चंद्रगुप्तमवलोक्य
विफलमिव राक्षसप्रयत्नमवगच्छामि। राक्षसमतिपरिगृहीतं च मलयकेतुमवलोक्य चलितमि
वाधिराज्याच्चंद्रगुप्तमवगच्छामि। कुतः॥ कौटिल्यधीरज्जुनिबद्धमूर्त्तिं मन्ये स्थिरां मौर्यकुलस्य ल
क्ष्मीं॥ उपायहस्तैरपि राक्षसेन निकृष्यमाणामिव लक्षयामि॥२४॥ तदेवमनयोः सुनयशालिनोः
सचिवयोर्विरोधे संशयितेव राजलक्ष्मीर्लक्ष्यते। कुतः॥ विरुद्धयोर्भृशमिह मंत्रिमुख्ययोर्महावने
वनगजयोरिवांतरे॥ अनिश्चयाद्गजवध्वायेव भीतया गतागतैर्ध्रुवमिह खिद्यते श्रिया॥२५॥ तथा

वदहममात्यराक्षसंपश्यामि।ततःप्रविशत्यासनस्थःस्वभवनगतःपुरुषेणानुगम्यमानःसचिंतोरा
क्षसः।२।सबाष्पं।कष्टंभोःकष्टं॥वृष्णीनामिवनीतिविक्रमगुणव्यापारशांतद्विषांनंदानांविमलेकु
लेऽकरुणयानीतेनियत्याक्षयं॥चिंतावेशसमाकुलेनमनसारात्रिंदिवंजाग्रतःसैवेयंममचित्र
कर्मरचनाभित्तिंविनावर्त्तते।।३१।।अपिच।।नेदंविस्मृतभक्तिनानविषयव्यापारमूढात्मनाप्राण
प्रच्युतिभीरुणानचमयानात्मप्रतिष्ठार्थिना॥अत्यर्थंपरदास्यमेत्यनिपुणंनीतौमनोदीयतेदेवः
स्वर्गगतोपिशत्रुनिधनेनाराधितःस्यादिति॥३२॥आकाशमवलोक्यसास्रं।भगवतिकम
लालयेभृशमगुणज्ञासि।कुतः॥आनंदहेतुमपिदेवमपास्यनंदंरक्तासिकिंकथयवैरिणिमौ
र्यपुत्रे॥दानांबुराजिरिवगंधगजस्यनाशेतत्रैवकिंनचपलेप्रलयंगतासि।३३।अपिचानभि १७

32

जाते॥ पृथिव्यां किं दग्धाः प्रथितकुलजा भूमिपतयः पतिं पापे मौर्यं यदसि कुलहीनं वृतवती॥ प्रकृत्या वा काशप्रसवकुसुमप्रांतचपला पुरंध्रीणां प्रज्ञा पुरुषगुणविज्ञानविमुखी॥ ३॥ अपि च। अविनीते तदहमाश्रयोन्मूलनादेव त्वामकामां करोमि। विचिंत्य। मया तावत्सुहृत्तमस्य चंदनदासस्य गृहे गृहजनं निक्षिप्य नगरान्निर्गच्छता न्याय्यमाचरितं। किं कारणमिति। कुसुमपुराभियोगं प्रत्यनुदासीनो राक्षस इति तत्रस्थानामस्माभिः सहैककार्याणां देवपादपद्मोपजीविनां नोद्यमः शिथिलीभविष्यति। चंद्रगुप्तशरीरमभिद्रोग्धुमस्मत्प्रयुक्तानां तीक्ष्णरसदायिनामुपसंग्रहार्थं परपक्षोपजापार्थं च महता कोशसंचयेनावस्थापितः शकटदासः। प्रतिक्षणमरातिवृत्तांतोपलब्धये तत्संहतिभेदाय च व्यापारिताः सुहृदो जीवसिद्धिप्रभृतयः। तत्किमतिबहुना। इष्टात्मजः सपदि सा

33

न्वयएवदेवःशार्दूलपोतमिवयंपरिपोष्यनष्टः॥ तस्यैवबुद्धिविशिखेनभिनत्तिमर्मवर्मीभवेद्य
दिनदैवमदृश्यमानं॥ ३५॥ ततःप्रविशतिकंचुकी।२। कामंनंदमिवप्रमथ्यजरयाचाणक्यनीत्याय
थाधर्मोमौर्यइवक्रमेणनगरेनीतःप्रतिष्ठांमयि॥ तंसंप्रत्युपचीयमानमपिमेलब्धांतरःसेवयालो
भोराक्षसवज्जयाययततेजेतुंनशक्नोतिच॥ ३६॥ इदममात्यराक्षसस्यगृहंयावत्प्रविशामि। प्र
विश्यावलोक्यच। स्वस्तिभवते। राक्ष०। आर्यअभिवादये। प्रियंवदकआसनमुपनयात्रभवतः। पुरु
ष। एदंआसणंउवविसदुअज्जो। कंचु०। नाढ्येनोपविश्य। अमात्यकुमारोमलयकेतुरमात्यंविज्ञापय
ति। चिरात्प्रभृत्यार्यःपरित्यक्तोचितशरीरसंस्कारइतिपीड्यतेमेहृदयं। यद्यपिस्वामिगुणाःसहसा १८
नशक्यंतेविस्मर्तुंतथापिमद्विज्ञापनांमानयितुमर्हत्यार्यइत्याभरणानिनिर्दिश्यइमान्याभरणानि

कुमारेण स्वशरीरादवतार्य प्रेषितानि तत्परिधत्तामार्यः। राक्ष०। आर्यजाजले विज्ञाप्यतामस्मद्वच
नात्कुमारः। विस्मृता मया सहगुणपक्षपातिना स्वामिगुणाः॥ किंतु॥ न तावन्निर्वीर्यैः परपरिभवक्ले
शकृपणैर्वहाम्यंगैरेभिः प्रतनुमपि संस्काररचनां॥ न यावन्निःशेषक्षपितरिपुचक्रस्य निहितं सु
गांगे हैमांगं नृवर तव सिंहासनमिदं॥ २०॥ कं०। त्वय्यमात्ये नेतरि सुलभमेवैतत्कुमारेण। तत्पाल्य
तां कुमारस्य प्रथमः प्रणयः। राक्ष०। आर्य कुमार इवानतिक्रमणीयवचनो भवानपि तदनुष्ठीयतां
कुमारस्याज्ञा। कंचु०। नाट्येन भूषणानि परिधाप्य स्वस्ति भवते स्वनियोगं साधयाम्यहं। राक्ष०। आर्य
अभिवादये। निष्क्रांतः कंचुकी। राक्ष०। प्रियंवदक अस्मद्दर्शनार्थी द्वारि कस्तिष्ठतीति विज्ञायतां। पुरुषः।
जं अज्जो आणवेदित्ति परिक्रम्याहितुंडिकमवलोक्य। अज्ज को तुमं। आहि०। भद्द अहं क्खु आहितुं



डिओजिणविसोणाम।इछामिअमच्चरक्खसस्सपुरदोसप्पेहिंकीडिदुं।पुरु०।चिठ्ठदावजावअम
च्चरक्खसस्साणिवेदेमि।राक्षसमुपसृत्य।अमच्चएसोक्खुआहितुंडिओइछदिअमच्चस्सपुरदो
सप्पेहिंकीडिदुं।राक्ष०।वामाक्षिस्पंदंसूचयन्नात्मगतं।कथंप्रथममेवसर्पदर्शनं।प्रकाशं।प्रिय
वदकननः कुतूहलंसर्पेषु तत्पारितोष्यविसर्जयैनं।पुरु०।जंअज्जोआणवेदित्तिआहितुंडिकमुप
सृत्य।भद्दएसोक्खुअमच्चोसप्पअदंसणेणविदेपसादंकरेदिणउणदंसणेण।आहि०।भद्दवि
णवेहिममवअणेणअमच्चं।णकेवलंसप्पजीवीपाउअकविक्खुअहं।ताजइममदंसणेणअ
मच्चोपसादंणकरेदिताएदंपिदावपत्तंवाचेदुंपसीददुत्ति।पुरु०।तुमंचिठ्ठदावअमच्चरक्खस
स्सणिवेदेमीतिपत्रंगृहीत्वाराक्षसमुपसृत्य।अमच्चएसोभणादिअहंणकेवलंसप्पजीवीपा

१७

36

उअकविक्खुअहंताजइदंसणेनअमच्चोपसादंणकरेदिताएदंपिपत्तंवाचेदुंपसीददुत्ति।राक्ष०।
पजंग्गहीलावाचयति॥पाउणणिरवसेसंकुसुमरसंअत्तणोकुसलदाए॥जंउग्गिरेइभमरोतंअ
णाणंकुणइकज्जं॥रा०॥विचिंत्यात्मगतं।अयेकुसुमपुरवृत्तांतज्ञोहंत्वत्प्रणिधिरितिगाथार्थः।आः
कार्यव्यग्रत्वान्मनसःप्रभूतत्वाच्चप्रणिधीनामिदानींस्मृतिरुपलब्धा।व्यक्तमाहितुंडिकछद्मना
विराधगुप्तेनभवितव्यं।प्रकाशं।प्रियंवदकप्रवेशयैनंसुकविरेषश्रोतव्यमस्मात्सुभाषितं।पु०।
जंअमच्चोआणवेदित्तिआहितुंडिकमुपसृत्यउवसप्पदुअज्जो।आहितुंडिकनाट्येनोपसृत्यविलो
क्यस्वगतं।संस्कृतमाश्रित्य।अयममात्यराक्षसस्तिष्ठति। ॥वामांबाहुलतांनिवेश्यशि
थिलं कंठेविवृत्ताननास्कंधेदक्षिणयाबलान्निहितयाप्यंकेपतंत्यामुहुः॥गाढालिंगनसंगपी

37

उतमुखं यस्योद्यमाशंकिनी मौर्यस्योरसि नाधुनापि कुरुते वामेतरं श्रीः स्तनं॥ अथ प्रकाशं। जअदु२ अमच्चो। राक्ष०। विलोक्य। अये विराध इत्यर्धोक्ते विरूढश्मश्रुः। प्रियंवदक भुजंगैरिच्छामि क्रीडितुमिदानीं तद्विश्रम्यतां परिजनेन त्वमपि स्वमधिकारमशून्यं कुरु। पुरु०। जं अमच्चो आणवेदि। इति सपरिवारो निष्क्रांतः। राक्ष०। सखे विराधगुप्त इदमासनमास्यतां। विरा०। यदाज्ञापयत्यमात्य इति नाट्येनोपविष्टः। राक्ष०। निर्वर्ण्य। अहो देवपादपद्मोपजीविनो जनस्यावस्थेयमिति रोदिति। विरा०। अमात्यालं शोकेन। नातिचिरादमात्योस्मान्पुरातनीमवस्थामारोपयिष्यति। राक्ष०। सखे विराधगुप्त वर्णय कुसुमपुरवृत्तांतं। विरा०। अमात्य विस्तीर्णः कुसुमपुरवृत्तांतस्तदाज्ञापय कुतः प्रभृति कथयामि। राक्ष०। सखे चंद्रगुप्तस्यैव तावन्नगरप्रवेशात्प्रभृत्यस्मत्प्रयुक्तैस्तीक्ष्णरसदायि

२०

भिः किमनुष्ठितमित्यादितः श्रोतुमिच्छामि। विरा० एष कथयामि। अस्ति तावच्छकयवनाकिरात
कांबोजपारसीकबाह्लीकप्रभृतिभिश्चाणक्यमतिपरिगृहीतैश्चंद्रगुप्तपर्वतेश्वरबलैरुदधिभि
रिव प्रलयकालचलितसलिलसंचयैः समंतादुपरुद्धं कुसुमपुरं। राक्ष० शस्त्रमाकृष्य। ससंभ्र
मं। मयि स्थिते कः कुसुमपुरमवरोत्स्यति। प्रवीरक २ क्षिप्रमिदानीं॥ प्राकारं परितः शरासनधरैः क्षि
प्रं परिक्षिप्यतां द्वारेषु द्विरदैः पराद्विपघटाभेदक्षमैः स्थीयतां॥ मुक्त्वा मृत्युभयं प्रहर्तुमनसः शत्रोर्ब
ले दुर्बले ते निर्यांतु मया सहैकमनसो येषामभीष्टं यशः॥ ८॥ विरा० अमात्यालमावेगेन वृत्तमि
दं वर्ण्यते। राक्ष० कथं वृत्तमिदं। निःश्वस्य। मया पुनर्ज्ञातं स एवायं कालो वर्त्तत इति। शस्त्रमुत्सृज्य। सा
स्रं। हा देव नंद स्मरति ते प्रसादानां राक्षसः। यस्त्वमत्र काले॥ यत्रैषा मेघनीलाचलति गजघटारा

क्षसस्तत्र्यायादेतस्यारिम्लवंपाःस्तुतिनुरगबलंधार्यतांराक्षसेन।। पत्तीनांराक्षसोयंनयतु
बलमितिप्रेषयन्मह्यमाज्ञांनाज्ञासीःप्रीतियोगात्स्थितमिहनगरेराक्षसानांसहस्त्रं।।१।।त
तस्ततः।। विरा०। ततःसमंतादुपरुद्धंकुसुमपुरमवलोक्यबहुदिवसप्रवृत्तमतिमहदुपरोधवै
शसमुपरिपौराणांपरिवर्त्तमानमसहमानेतस्यामप्यवस्थायांपौरजनापेक्षयासमपक्रांतेसु
रुंगामेत्यतपोवनायदेवेसर्वार्थसिद्धौस्वामिविरहात्प्रशिथिलीकृतप्रयत्नेषुयुष्मद्बलेषुजय
घोषणाव्याघातादिसाहसानुमितांतर्नगरनिवासिषुपुनरपिनंदराज्यप्रत्यानयनायसुरंगा २१
मभिगतेषुयुष्मासुचंद्रगुप्तनिधनाययुष्मत्प्रयुक्तयाविषकन्ययाघातितेतपस्विनिपर्वतेश्व
रे। राक्ष०। सखेपश्याश्चर्यं।। कर्णेनेवविषांगनैकपुरुषव्यापादिनीरक्षिताहंतुंशक्तिरिवार्जुनं

बलवतीयाचंद्रगुप्तंमया॥ साविष्णोरिवविष्णुगुप्तहतकस्यात्यंतिकश्रेयसेहैडिंबेयमिवेत्य
पर्वतनृपंतद्वध्यमेवावधीत्॥४२॥ विरा० अमात्यदेवस्यात्रकामचारस्तत्किंक्रियतां॥ राक्ष० त
तस्ततः॥ विराध० ततः पितृवधत्रासादपक्रांतेमलयकेतौकुमारेविश्वासितेपर्वतकभ्रातरिवै
रोधकेप्रकाशितेचंद्रगुप्तस्यनंदभवनप्रवेशे॥ राक्ष० ततः २॥ विरा० ततश्चाणक्येनाहूयाभिहि
ताः कुसुमपुरनिवासिनः सर्वएवसूत्रधाराः। यथासांवत्सरिकादेशादद्यैवार्धरात्रसमयेचंद्र
गुप्तस्यनंदभवनप्रवेशोभविष्यत्यतः प्रथमद्वारप्रदेशात्प्रभृतिसंस्क्रियतांराजमंदिरमिति।
ततः सूत्रधारैरभिहितं। आर्यप्रथममेवदेवस्यचंद्रगुप्तस्यनंदभवनप्रवेशमनुपलभ्यसूत्र
धारेणदारुवर्मणाकनकतोरणन्यासादिभिः संस्कारविशेषैः संस्कृतंराजद्वारं। सांप्रतमस्मा

41

भिरभ्यंतरे संस्कारो विधेय इति। ततश्चाणक्यबटुना ऽनादिष्टे नैव दारुवर्मणा संस्कृतं राजभव
नद्वारमिति परितुष्टेनेव सुचिरं दाक्ष्यमस्याभिप्रशस्याभिहितं। अचिरादस्य दाक्ष्यस्यानुरूपं दा
रुवर्मा फलमधिगमिष्यति। राक्ष०। सोद्वेगं। सखे कुतश्चाणक्यबटोः परितोषः। अफलमनिष्टफ
लं वा दारुवर्मणः प्रयत्नमवगच्छामि। यदनेन बुद्धिमोहादथवा राजभक्तिप्रकर्षाद्दर्शयता नियो
गकालमप्रतीक्षमाणेन जनितश्चाणक्यबटोश्चेतसि बलवान्विकल्पः। ततः २। विरा०। ततश्चा
णक्यहतकेनानुकूललग्नवशादर्द्धरात्रसमये चंद्रगुप्तस्य नंदभवनप्रवेशो भविष्यतीति पौ
रान्शिल्पिनश्च गृहीतार्थान्कृत्वा तस्मिन्नेव क्षणे पर्वतेश्वरभ्रातरं वैरोधकमेकासने चंद्रगु
प्तेन सहोपवेश्य कृतः पृथिवीराज्यविभागः। राक्ष०। किमतिसृष्टः पर्वतकभ्रात्रे वैरोधकाय



पूर्वप्रतिश्रुतोराज्यार्द्धभागः।विरा०।अथकिं।राक्ष०।स्वगतं।नियतमतिधूर्त्तेनबटुनातस्यापितप
स्विनःकमप्युपांशुवधमाकलय्यपर्वतेश्वरविनाशजनितस्यायशसःपरिहारार्थमेषालोकोक्ति
रूपरचिता।प्रकाशं।ततस्ततः।विरा०।ततःप्रथममेवप्रकाशितेराज्ञौचंद्रगुप्तस्यनंदभवनप्रवेशे।
कृताभिषेकेहिमविमलमुक्तागुणपरिक्षेपोपरचितविचित्रपट्टमयवारवाणप्रछादितशरीरेमणिम
यमुकुटबंधनिबिडसंयमितरुचिरतरमौलौसुरभिकुसुमदामसव्यापसव्यविक्षेपावभासितवि
पुलवक्षस्स्थलेपरिचितजनैरप्यज्ञायमानशरीराकृतौचाणक्यहतकादेशाच्चंद्रगुप्तोपवाह्यांचं
द्रलेखांनामगजवशामारूढेचंद्रगुप्तानुयायिनाराजलोकेनचानुगम्यमानेदेवस्यनंदस्यभव
नंप्रविशतिवैरोधकेयुष्मत्प्रयुक्तेनसूत्रधारेणदारुवर्मणाचंद्रगुप्तोयमितिमन्यमानेनवैरोध

43

कस्योपरिपातनाय सज्जीकृतं यंत्रतोरणं। अत्रांतरे बहिर्निगृहीतवाहनेषु स्थितेषु चंद्रगुप्तानुया
यिषु भूमिपालेषु युष्मत्प्रयुक्तेनैव चंद्रगुप्तनिषादिना बर्बरकेण कनकदंडिकांतर्गतामसिपुत्रि
कामाक्रष्टुकामेनावलंबिताकरेण कनकशृंखलावलंबिनी कनकदंडिका। राक्ष॰ स्वगतं। उभ
योरप्यस्थाने यत्नः। विराध॰ अथ जघनाभिघातमुपेक्ष्यमाणा गजवधूरतिजवतया गत्यंतरमा
रूढवती। प्रथमगत्यनुरोधप्रत्याकलनमुक्तेन प्राग्नष्टलक्ष्यं पतता यंत्रतोरणेनोत्कृष्टकृपाणीव्य
ग्रपाणिरनासादयन्नेव चंद्रगुप्तप्रत्याशया वैरोधकं दारुवर्मणा हतस्तपस्वी बर्बरकः। ततो दारु
वर्मणा यंत्रतोरणपातमात्मविनाशफलमवधार्य पूर्वमेवोत्तुंगतोरणसमारूढेन यंत्रघट्टनबी २३
जं लोहकीलकमादाय हस्तिनीगत एव हतस्तपस्वी वैरोधकः। राक्ष॰ कष्टमनर्थद्वयमापतितं न

हतश्चंद्रगुप्तः हतौ वैरोधकबर्बरकौ। स्वगतं। न हतौ तौ सर्वथा हतावयमिति। प्रकाशं। अथ सूत्र
धारो दारुवर्मा किंथं। विरा०। वैरोधकपुरःसरैरेषपदातिलोकैरेकैकलोष्टघातं हतः। राक्ष०। सास्त्रं।
कष्टं भोः कष्टं। अहो सुहृद्वत्सलेन दारुवर्मणा वियुक्ताः स्मः। अथ तेन तत्र भिषजाऽभयदत्तेन कि
मनुष्ठितं। विरा०। अमात्य सर्वमनुष्ठितं। राक्ष०। सहर्षं। अपिनाम सखे हतश्चंद्रगुप्तहतकः। विरा०।
अमात्य दैवान्न हतः। राक्ष०। सविषादं। तत्किमिदानीं परितुष्टः कथयसि सर्वमनुष्ठितमिति। विरा०।
अमात्यकल्पितमनेन विषयोगचूर्णमिश्रमौषधं चंद्रगुप्ताय। तच्च प्रत्यक्षीकुर्वता चाणक्यहतके
न कनकभाजने वर्णांतरमुपलक्ष्याभिहितश्चंद्रगुप्तः। वृषल २ सविषमिदमौषधं न पातव्यमिति।
राक्ष०। शठः खल्वसौ×गत×बडुः। अथ स वैद्यः कथं। विराध०। ततः स खलु वैद्यस्तदेवौषधं पायि

45

तश्चोपरतश्च।राक्ष०।सविषादं।महान्विज्ञानराशिरुपरतः।अथशयनाधिकृतस्यतस्यप्रमोदकस्य
किंवृत्तं।विरा०।आर्ययदितरेषां।राक्ष०।सोद्वेगं।कथमिव।विराध०।सखलुमूर्खोयुष्माभिरतिसृष्ट
मतिमहांतमर्थराशिमुपलभ्यमहताव्ययेनोपभोक्तुमारब्धवान्।ततःकुतोयंस्तूयान्नधनागमस्त
वेतिपृच्छ्यमानोयंयदावाक्यभेदान्बहूनगमत्तदाचाणक्यहतकादेशाद्विचित्रेणवधेनव्यापादितः।
राक्ष०।सोद्वेगं।कथमत्रापिवयमेवोपहतादैवेन।अथशायितस्यचंद्रगुप्तस्यशरीरेप्रहर्तुमस्मत्प्र
युक्तानांनरपतिशयनगृहस्यांतःसुरंगामेत्यप्रथममेवनिवसतांबीभत्सकादीनांकोवृत्तांतः।वि
राध०।अमात्यदारुणोवृत्तांतः।राक्ष०।सोद्वेगं।कथंदारुणोवृत्तांतः।नखलुविदितास्तेतत्रनिवसं २४
तश्चाणक्यहतकस्य।विरा०।अमात्यअथकिं।प्राक्चंद्रगुप्तप्रवेशात्ताविस्मात्रेणैवशयनगृहं



समंताद्दुरात्मनाचाणक्यहतकेनावलोकितं।ततोन्यस्मात्क्षितिछिद्राद्गृहीतभक्तावयवानांनिःस
रंतीनांपिपीलिकानांपंक्तिमवलोक्यपुरुषगर्भमेतद्गृहमितिगृहीतार्थेनदाहितंतद्देवशयनगृहं।
तस्मिंश्चदह्यमानेधूमनिवहाभिरुद्धदृष्टिविषयाःप्रथममपिहितमनधिगम्यद्वारंसर्वएवबीभत्सा
दयस्तत्रैवज्वलनमुपगताउपरताश्च।राक्ष०।सास्रं।सखेपश्यदैवसंपदंदुरात्मनश्चंद्रगुप्तहतक
स्य।कुतः।कन्यातस्यवधाययाविषमयीगूढंप्रयुक्तामयादैवात्पर्वतकस्तयाविनिहतोयस्तस्यरा
ज्यार्द्धहरः।येशस्त्रेषुरसेषुचप्रणिहितास्तैरेवतेघातितामौर्यस्यैवफलंतिपश्यविविधश्रेयांसि
मेनीतयः॥४॥विरा०।अमात्यतथापिप्रारब्धमपरित्याज्यमेव।पश्यत्वमात्यः॥प्रारभ्यतेनखलु
विघ्नभयेननीचैःप्रारभ्यविघ्नविहताविरमंतिमध्याः॥विघ्नैःपुनःपुनरपिप्रतिहन्यमानाःप्रारब्ध

47

मुत्तमगुणानपरित्यजंति॥१४॥ अपिच॥ किंशेषस्यभरव्यथानवपुषिक्ष्मांनक्षिपत्येषयत्किंवाना
स्तिपरिश्रमोदिनपतेरास्तेनयन्निश्चलः॥ किंत्वंगीकृतमुत्सृजन्कृपणवच्छ्लाघ्योजनोलज्जतेनि
र्व्यूढिःप्रतिपन्नवस्तुषुसतामेकंहिगोत्रव्रतं॥१५॥ राक्ष०। सखेप्रारब्धमपरित्याज्यमितिप्रत्यक्षमे
वैतद्भवतः। ततस्ततः। विरा०। ततःप्रभृतिचंद्रगुप्तशरीरेसहस्रगुणमप्रमत्तश्चाणक्यहतकएभ्य
एतदीदृशांसंभवतीत्यन्विष्यान्विष्यनिगृहीतवान्कुसुमपुरनिवासिनोयुष्मदीयानाप्तपुरुषान्॥
राक्ष०। सावेगं। अथकेकेनिगृहीताः। विरा०। अमात्यादावेवक्षपणकोजीवसिद्धिःसनिकारंन
गरान्निर्वासितः। राक्ष०। आत्मगतं। एतावत्सह्यं। नह्यपरिग्रहंस्थानभ्रंशःपीडयिष्यति। प्रकाशं।
सखेअथकमपराधमुद्दिश्यनिर्वासितः। विरा०। एषदुरात्माराक्षसप्रयुक्तोविषकन्ययापर्वतेश्व

२५

रंघातितवानिति। राक्ष०। स्वगतं। साधु कौटिल्य साधु। कुतः।। परिहृतमयशः पातितमस्मासु वि
घातितोर्धराज्यहरः।। एकमपिनीतिवीजंबहुविधतामेतियस्यतव।।१६।। प्रकाशं। ततः २। विरा०। त
तश्चंद्रगुप्तशरीरमभिद्रोग्धुमनेनव्यापारितादारुवर्मादयइतिनगरेप्रख्याप्यशकटदासः शूल
मारोपितः। राक्ष०। सास्रं। हा सखे शकटदास अयुक्तस्तवायमीदृशो मृत्युः। अथवा स्वाम्यर्थमुपरतो
न शोच्यस्त्वमसि वयमेवात्र शोच्याः। येन नंदकुलविनाशेपि जीवितुमिच्छामः।। विरा०। अमात्य नैतदेवं
स्वाम्यर्थएव साधयितव्यो ननु यूयं शोच्याः। राक्ष०। सखे।। अस्माभिरमुमेवार्थमालंब्य न जिजीविषा।।
परलोकगतो देवः कृतघ्नैर्नानुगम्यते।।१७।। विरा०। अमात्य नैतदेवं युष्माभिरमुमेवार्थं कृतज्ञैरि
त्यादि पुनः पठति।। राक्ष०। सखे कथ्यतामपरस्यापि सुहृद्व्यसनस्य श्रवणे सज्जा वयं।। विरा०। ततए

तदुपलभ्यचंदनदासेनारूढसौहार्देनापवाहितममात्यकलत्रं।राक्ष०।सखेक्रूरस्यचाणक्यबटो
र्वितद्वमयुक्तमनुष्ठितंचंदनदासेन॥विरा०।अमात्यनयुक्ततरःसुहृद्द्रोहः॥राक्ष०।ततस्ततः॥विरा०।त
तोयाच्यमानेनापियदानसमर्पितममात्यकलत्रंततःकुपितेनचाणक्यबटुना।राक्ष०।सावेगं।नख
लुव्यापादितः।विरा०।अमात्यनखलुव्यापादितःकिंतुगृहीतगृहसारःसपुत्रकलत्रोवधायबंधना
गारेनिक्षिप्तः।राक्ष०।सखेवतकिमितिपरितुष्टःकथयस्यपवाहितमनेनराक्षसकलत्रमिति।ननुव
क्तव्यंसंयतःसकलत्रोराक्षसइति।प्रविश्यपुरुषः२।जअदु२अज्जो।अज्जएसोक्खुसअडदासो
पडिहारभूमिंउवट्ठिदो।राक्ष०।सहर्षं।अपिसत्यं।पुरुषः।अलिअंकिंवाअमच्चपादोवजीविणोमंति
दुंजाणंति।राक्ष०।सखेविराधगुप्तकथमेतत्।विरा०।अमात्यस्यादेतदेव।यतोरक्षतिखलुभव्यं

२६

भवितव्यता।।राक्ष०।।प्रियंवदकयद्येवंतत्किंविचारयसिक्षिप्रंप्रवेशयसमाश्वासयमां।।पुरु०।।जंअम
च्चोआणवेदि इतिनिष्क्रांतः।।ततःप्रविशतिसिद्धार्थकेनानुगम्यमानःशकटदासः।।स्वगतं।।दृष्ट्वा
मौर्यमिवप्रतिष्ठितपदंशूलंधरित्र्यास्तलेतल्लक्ष्मीमिवचेतनाप्रमथिनींमूर्ध्नश्चवध्यस्रजं।।श्रुत्वा
स्वाम्युपरोधरौद्रविषमानाघाततूर्यस्वनान्नध्वस्तंप्रथमाभिघातकठिनंमन्येमदीयंमनः।।२०।
नाट्येनावलोक्यसहर्षं।अये।अयममात्यराक्षसस्तिष्ठति।यएषः।।अक्षीणभक्तिःक्षीणेपिनंदेस्वाम्य
र्थमुद्वहन्।।पृथिव्यांस्वामिभक्तानांप्रमाणेपरमेस्थितः।।२१।।उपसृत्य।जयत्वमात्यः।।राक्ष०।।ना
ट्येनावलोक्यसहर्षं।सखेशकटदासदिष्ट्याकौटिल्यगोचरगतोपिदृष्टोसितत्परिष्वजस्वमां।।श
क०।।तथाकरोति।।राक्ष०।।नंपरिष्वज्यइदमासनमास्यतां।।शक०।।यदाज्ञापयत्यमात्य इतिनाट्येनोप

विष्टः। राक्ष०। सखे शकटदास कथय कोयमस्य मे हृदयानंदस्य हेतुः। शाक०। सिद्धार्थकं निर्दिश्य। अ-
मात्यानेन प्रियसुहृदा सिद्धार्थकेन घातकान्विद्राव्य वधस्थानादपहृतोस्मि। राक्ष०। सहर्षं। भद्र सि-
द्धार्थक काममपर्याप्तमस्य प्रियस्येदं तथापि गृह्यतां। स्वगात्रादवतार्य भूषणानि प्रयच्छति। सिद्धा०।
गृहीत्वा पादयोः पतति। स्वगतं। अअं क्खु अज्जोवदेसो भोदु तधा करिस्सं। प्रकाशं। अमच्च एत्थ मे
पढमपविठ्ठस्स णत्थि को वि परिचिदो जखणं अमच्चप्पसादं णिक्खिविअ णिव्वुदो भविस्सं। ता इच्छा-
मि एदाए मुद्दाए मुद्दिदं अमच्चस्स ज्जेव्व भंडआरे णिक्खिविदुं। जदा एदिणा पओअणं भविस्सदि त-
दा गेण्हिस्सं। राक्ष०। भद्र को दोष एवं क्रियतां। सिद्धा०। जं अमच्चो आणवेदि इति मुद्रयति। शाकट०।
मुद्रां विलोक्य। अयेऽमात्यनामांकितेयं मुद्रा। राक्ष०। विलोक्य। सविषादं सवितर्कमात्मगतं। कष्ट

२७

मस्मदुकंगाविनोदार्थंनगरान्निष्क्रामतोममहस्ताद्ब्राह्मण्यागृहीता तत्कथमस्यहस्तमुपागता।
प्रकारां।भद्रसिद्धार्थककुतस्त्वयेयमधिगता।सिद्धा०।अमच्च अत्थिकुसुमउरणिवासीमणिआ
रसेट्ठी चंदणदासोणाम।तस्सगेहदुआरेपडिदामएउवलद्धा।राक्ष०।युज्यते।सिद्धा०।अमच्चकिं
एत्थजुज्जदि।राक्ष०।भद्रयन्महाधनानांगृहद्वारिपतितस्यैवंविधस्योपलब्धिरिति।शाक०।स
खेसिद्धार्थकामात्यनामांकितेयंमुद्रातदितोपिबहुतरेणार्थेनभवंतममात्यस्तोषयिष्यतितद्दीय
तामेषामुद्रा।सि०।अज्जणंएसोज्जेवमेपरितोसोजंइमाएमुद्दाएअमच्चोविपरिग्गहंकरेदि।इति
मुद्रांसमर्पयति।राक्ष०।सखेशकटदासअनयेवमुद्रयास्वाधिकारेव्यवहर्त्तव्यंत्वया।शाक०।यदा
ज्ञापयत्यमात्यः।सिद्धा०।अमच्चविणवेमि।राक्ष०।विश्रब्धंब्रूहि।सिद्धा०।जाणादिज्जेवअमच्चोज

धाचाणक्कबडुअस्स किं वि विप्पिअं कदुअ ण क्खु पुणो पाडलिउत्ते पवेसो त्ति। ता इच्छामि अहं अमच्चस्स
ज्जेव सुप्पसण्णपादे सेविदुं। राक्ष०। प्रियं नः किंतु त्वदभिप्रायापरिज्ञानेनांतरितोयमस्माकमनुनयः॥
तदेवं क्रियतां। सिद्धा०। अणुगहिदो म्हि। राक्ष०। सखे शकटदास विश्रामय सिद्धार्थकं। शकट०। यदाज्ञा
पयत्यमात्य इति सिद्धार्थकेन सह निष्क्रांतः। राक्ष०। सखे विराधगुप्त वर्णयेदानीं कुसुमपुरवृत्तांतशे
षं। अपि क्षमंतेऽस्मदुपजापं चंद्रगुप्तप्रकृतयः। विरा०। अमात्य बाढं क्षमंते। ननु यथाप्रधानमागच्छं
त्येव। राक्ष०। सखे किं तत्र कारणं। विरा०। अमात्य इदं कारणं। मलयकेतोरपक्रमणात्प्रभृति कुपितश्चं
द्रगुप्तश्चाणक्यस्येति। चाणक्योप्यजितकाशितया तैस्तैराज्ञाभंगैश्चंद्रगुप्तस्य चेतःपीडामुपज २८
नयतीत्ययमपि ममानुभवः। राक्ष०। सहर्षं। सखे विराधगुप्त त्वमनेनैवाहितुंडिकच्छद्मना पुनः

कुसुमपुरमेवैदि तत्राहिमेप्रियवयस्योवैतालिकव्यंजनःस्तनकलशनामाप्रतिवसति।सत्वयामद्व
चनाद्वाच्यः।यथाचाणक्येनक्रियमाणेष्वाज्ञाभंगेषुचंद्रगुप्तस्त्वयासमुत्तेजनसमर्थैःश्लोकैरुपश्लो
कयितव्यः।कार्यंचाधिवृत्तंकरभकहस्तेसंदेष्टव्यमिति।विरा०।यदाज्ञापयत्यमात्यइतिनिष्क्रां
तः।प्रविश्यपुरुषः।जअदु२अमच्चो।अमच्चसअडदासोविण्णवेदिएदेक्खुतिण्णिअलंकारजोड
आविक्किणीअंतितापच्चक्खीकरेदुअमच्चो।राक्ष०।विलोक्यात्मगतं।अहोमहार्घाण्याभरणानि।
प्रकाशं।भद्रोच्यतांशकटदासःपरितोष्यविक्रेतारंगृह्यतामिति।पुरु०।जंअमच्चोआणवेदीतिनि
ष्क्रांतः।राक्ष०।यावदहमपिकुसुमपुरायकरभकंप्रेषयामि।उत्थाय।अपिनामचंद्रगुप्ताच्चाणक्यो
भिद्येत।अथवासिद्धमेवसमीहितंपश्यामि।कुतः।।मौर्यस्तेजसिसर्वभूतलभुजामाज्ञापकोवर्त्त

55.

तेचाणक्योपिमदाश्रयादयमभूद्राजेतिजातस्मयः॥राज्यप्राप्तिकृतार्थमेकमपरंतीर्णप्रतिज्ञार्ण
वंसौहार्दात्कृतकृत्यतैवनियतंलब्धांतराभेत्स्याति॥५०॥ ॥इतिनिष्क्रांताःसर्वेद्वितीयोंकः॥छ॥
ततःप्रविशतिकंचुकी॥रूपादीन्विषयान्निरूप्यकरणैर्यैरात्मलाभस्त्वयालब्धस्तेष्वपिचक्षु
रादिषुहताःस्वार्थविबोधक्रियाः॥अंगानिप्रसभंत्यजंतिपटुतामाज्ञाविधेयानिमेन्यस्तंमूर्ध्निप
दंतथैवजरयातृष्णेमुधामाद्यसि॥५१॥परिक्रम्याकाशे।भोभोःसुगांगप्रासादाधिकृताःपुरुषाः
सुगृहीतनामादेवश्चंद्रगुप्तोवःसमाज्ञापयतिप्रवृत्तकौमुदीमहोत्सवरमणीयंकुसुमपुरमवलो
कयितुमिच्छामितत्क्रियंतामस्मद्दर्शनयोग्याःसुगांगप्रासादस्योपरिभूमयः।आकाशे।आक २८
र्ण्य।किंकथयंतिभवंतः।आर्यकिमविदितएवायंदेवस्यचंद्रगुप्तस्यकौमुदीमहोत्सवप्रतिषेधइति।

आः दैवोपहताः किमनेनवः प्राणहरेणकथोद्घातेन॥ शीघ्रमिदानीं॥ आलिंगंतुगृहीतधूपसुर
भीन्स्तंभान्पिनद्धस्रजः संपूर्णेंदुमयूखसंहतिरुचां सद्मामराणां श्रियः॥ सिंहासनधारणाद्ब
हुचिरंसंजातमूर्छामिवक्षिप्तश्चंदनवारिणासकुसुमः सेकोनुगृह्णातुगां॥ ५२॥ आकाशे॥ किंक
थयंतिभवंतः एतेत्वरामहे इति। भद्रास्त्वर्यतां२ अयमागतएवदेवश्चंद्रगुप्तः॥ यएषः॥ सुविश्लिष्टैरं
गैः पथिषुविषमेष्वप्यचलताचिरंधुर्येणोढागुरुरपिभुवोयास्यगुरुणा॥ धुरंतामेवोच्चैर्नववयसिवो
ढुंव्यवसितोमनस्वीदम्यत्वात्स्खलतिचनदुःखंवहतिच॥ ५३॥ नेपथ्ये। इतोदेवः। ततः प्रविशतिराजा
प्रतीहारीच। राजा॰ राज्यंहिनामराजधर्मानुवृत्तिपरस्यनृपतेर्महदप्रीतिस्थानं। कुतः॥ परार्थानुष्ठा
नेजडयतिनृपः ×स्वगतं× स्वार्थपरतांपरित्यक्तस्वार्थोनियतमयथार्थः क्षितिपतिः॥ परार्थश्चेत्स्वार्थ

दप्तिमततरोहंतपरवान्परायत्तः प्रीतेः कथमिवरसंवेत्तिपुरुषः ॥५४॥ अपिच। दुराराध्याहिलक्ष्मीरात्म
विद्भिरपिराजभिः। कुतः॥ तीक्ष्णादुद्विजतेमृदौपरिभवत्रासान्नसंतिष्ठतेमूर्खंद्वेष्टिनगच्छतिप्रणयि
तामत्यंतविद्वत्स्वपि॥ शूरेभ्योप्यधिकंबिभेत्युपहसत्येकांतभीरूनहोश्रीर्लब्धप्रसरेववेशावनितादुः
खोपचर्याजनैः॥५५॥ अन्यच्च। कृतककलहंकृत्वाकिंचित्कालंस्वतंत्रेणत्वयाव्यवहर्तव्यमित्याचार्यादे
शः। सचकथमपिमयामहापातकवदभ्युपगतः। अथवाशश्वदाचार्योपदेशसंस्क्रियमाणमतयःसर्वे
देवस्वतंत्रावयं॥ कुतः॥ इहविरचयन्साध्वींशिष्यःक्रियांननिवार्यतेत्यजतिचयदामार्गंमोहात्तदागुरु
रंकुशः॥ विनयरुचयस्तस्मात्संतःसदैवनिरंकुशाःपरतरमतःस्वातंत्रेभ्योवयंहिपराङ्मुखाः॥५६॥
प्रकाशं। आर्यवैहीनरेसुगांगप्रासादमार्गमादेशय। कंचु०। इतइतोदेवः। नाट्येनपरिक्रम्य। अयंसु

गांगप्रासादः॥ शनैः शनैरारोढुमर्हति देवः॥ राजा॥ नाट्येनारुह्य दिशोवलोक्य च॥ अहो शरत्संगमसंभृत
शोभाविभूतीनां दिशामतिरमणीयता॥ कुतः॥ शनैः शांतीभूताः सितजलधरच्छेदपुलिनाः समंता
दाकीर्णाः कलविरुतिभिः सारसकुलैः॥ चिताश्चित्राकारैर्निशि विकचनक्षत्रकुमुदैर्नभस्तः स्यंदंते
सरित इव दीर्घादशादिशः॥५७॥ अपि च॥ अपामुद्वृत्तानां निजमुपदिशंत्या स्थितिपदं दधत्या शालीना
मवनतिमुदारे सति फले॥ मयूराणामुग्रं विषमिव हरंत्या मदमहो कृतः कृत्स्नस्यायं विनय इव लोकस्य
शरदा॥५८॥ इमामपि॥ भर्तुस्तथा कलुषितां बहुवल्लभस्य मार्गं कथंचिदवतीर्य तनूभवंतीं॥ सर्वात्म
ना रतिकथाचतुरेव दूती गंगां शरन्नयति सिंधुपतिं प्रसन्नां॥५९॥ समंतान्नाट्येनावलोक्य॥ अये कथ
न प्रवृत्त कौमुदीमहोत्सवं कुसुमपुरं। आर्य वैहीनरे अथास्मद्वचनादाघोषितः कुसुमपुरे कौमुदी

59

महोत्सवः।कंचु०।अथकिं।आघोषितोदेवस्याज्ञयाकुसुमपुरेकौमुदीमहोत्सवः।राजा।आर्यतत्किंन
परिगृहीतमस्मद्वचनंपौरजनेन।कंचु०।कर्णौपिधाय।देवशांतंपापं।पृथिव्यामस्खलितपूर्वंदेवस्य
शासनंकथंपौरेषुस्खलितुमर्हति।राजा।आर्यवैहीनरेयद्येवंतत्किमप्रवृत्तःकौमुदीमहोत्सवम
द्यापिकुसुमपुरंपश्यामि।पश्य॥धूर्तैरन्वीयमानाःस्फुटचतुरकथाकोविदैर्वेशनार्यो नालंकुर्वंति
रथ्याःपृथुजघनभराक्रांतिमंदैःप्रयातैः॥अन्योन्यंस्पर्द्धमानानचगृहविभवैःस्वामिनोमुक्तशं
काःसाकंस्त्रीभिर्भजंतेविधिमभिलषितंपार्वणंपौरमुख्याः॥६०॥कंचु०।देवएवमेतत्।राजा।किमे
तत्।कंचु०।देवइदं।राजा।आर्यस्फुटमभिधीयतां।कंचु०।देवप्रतिषिद्धःकौमुदीमहोत्सवः।राजा। ३१
सक्रोधं।आः।केन।कंचु०।नातःपरमस्माभिर्देवोविज्ञापयितुंशक्यते।राजा।नखल्वार्यचाण

केनापहृतःप्रेक्षकाणामतिशयरमणीयश्चक्षुषोविषयः।कंचु॰देवकोन्योजीवितुकामोदेवस्य
शासनमुल्लंघयिष्यति।राजा।सक्रोधं।शोणोत्तरे उपवेष्टुमिच्छामि।प्रती॰देवइदंसिंहासणंउव
विसदुदेवो।राजा।नाट्येनोपविश्य।आर्यवैहीनरेआर्यचाणक्यमकृतकृत्यांतरंद्रष्टुमिच्छामि।कंचु॰।
यदाज्ञापयतिदेवइतिनिष्क्रांतः।ततःप्रविशत्यासनस्थःस्वभवनगतःकोपानुविद्धश्चिंतांनाटयन्चा
णक्यः२।आत्मगतं।कथंस्पर्द्धतेमयासहदुरात्माराक्षसः।कुतः॥कृतागाःकौटिल्योभुजगइवं
निर्यायनगराद्यथानंदान्हत्वानृपतिमकरोन्मौर्यवृषलं॥तथाहंमौर्येंदोःश्रियमपहरामीतिहृत
धीःप्रकर्षमद्बुद्धेरतिशयितुमेषव्यवसितः॥६१॥प्रत्यक्षवदाकाशेलक्ष्यंबध्वा।राक्षस२विर
म्यतामस्माद्दुर्व्यवसितात्॥कुतः।उत्सिक्तःकुसचिवदृष्टराज्यभारोनंदोसौनभवतिचंद्रगुप्तए

षः॥ चाणक्यस्त्वमपि चनैवकेवलंतेसाधर्म्यमदनुकृतेःप्रधानतैव॥ ६२॥ अथवानातिमात्रमस्मि
न्खलुनियमान्मनःखेदयितव्यं। कुतः। मद्भृत्यैःकिलनामपर्वतसुतोव्यापन्नःप्रलब्धांतरैरुद्युक्ताश्च
नियोगसाधनविधौसिद्धार्थकाद्याःस्पशाः॥ कृत्वासंप्रतिकैतवेनकलहंमौर्येंदुनाराक्षसंभेत्स्या
मिस्वमतेनभेदकुशलोह्येषप्रतीपोद्विषः॥ ६३॥ प्रविश्यकंचुकी। कष्टाखलुसेवा। कुतः॥ भेतव्यंनृप
तेस्ततःसचिवतोराज्ञस्ततोवल्लभादन्येभ्यश्चभवंतियेस्यभवनेलब्धप्रसादाविटाः॥ दैन्यादुन्मु
खदर्शनोपलपनैःपिंडार्थमायस्यतःसेवांलाघवकारिणींकृतधियःस्थानेश्ववृत्तिंविदुः॥ ६४॥ परि
क्रम्यावलोक्यच। इदमार्यचाणक्यस्यगृहंयावत्प्रविशामि। नाट्येनप्रविश्यावलोक्यच। अहोराजा
धिराजमंत्रिणोगृहसमू तिः। कुतः॥ उपलशकलमेतद्भेदकंगोमयानांबटुभिरुपहृतानांबर्हि

३२

62

षांस्तोममेतत्॥ शरणमपिसमिद्भिःशुष्यमाणाभिराभिर्विनमितपटलांतंदृश्यतेजीर्णकुड्यं॥६५॥
तत्स्थानेखल्वस्यवृषलोदेवश्चंद्रगुप्तइति। कुतः। स्तुवंत्यश्रांतास्याःक्षितिपतिमभूतैरपिगुणैः
प्रवाचःकार्पण्याद्यदवितथवाचोपिपुरुषाः॥ प्रभावस्तृष्णायाःसखलुसकलःस्यादितरथानि
रीहाणामीशस्तृणमिवतिरस्कारविषयः॥६६॥ विलोक्यसस्मयं। तदयमार्यचाणक्यस्तिष्ठति। यो
नंदमौर्यनृपयोःपरिभूयलोकमस्तोदयावदिशदप्रविभिन्नकालं॥ पर्यायपातितहिमांशुमसर्व
गामिधाम्नातिशाययतिधामसहस्रधाम्नः॥६७॥ जानुभ्यांभूमौनिपत्यजयत्वार्यः। चाण०। नाद्व
नावलोक्यवैहीनरेकिमागमनप्रयोजनं। कंचु०। आर्यप्रणतिसंभ्रमसमुच्छलितभूमिपालमौ
लिमणिशिखापिशंगीकृतपादपद्मयुगलःपादयोरार्यंप्रणिपत्यदेवश्चंद्रगुप्तोविज्ञापयति।

अकृतक्रियांतरमार्यं द्रष्टुमिच्छामि। चाण०। वृषलो मां द्रष्टुमिच्छति। वैहीनरेन खलु वृषलस्य श्रव
णमुपगतो मया कृतः कौमुदीमहोत्सवप्रतिषेधः। कंचु०। आर्य अथ किं। चाण०। सक्रोधं। आः केन
कथितं। कंचु०। भयं नाटयित्वा प्रसीदत्वार्यः। स्वयमेव सुगांगप्रासादगतेनावलोकितमप्रवृत्तकौ
मुदीमहोत्सवं कुसुमपुरं। चाण०। आः ज्ञातं तिष्ठ। ततो भवद्भिरेव मदंतरेण प्रोत्साह्य रोषितो वृषलः।
किमन्यत्। कंचु०। सभयं तूष्णीमधोमुखस्तिष्ठति। चाण०। अहो राजपरिजनस्य चाणक्यस्योप
रि द्वेषपातः। अथ क्व वृषलस्तिष्ठति। कंचु०। भयं नाटयन्। आर्य सुगांगप्रासादगतेन देवेनाह
मार्यपादमूलं प्रेषितः। चाण०। उत्थाय। कंचुकिन् सुगांगप्रासादमार्गमादेशय। कं०। इत इत आ ३३
र्यः। इत्युभौ परिक्रामतः। कं०। अयं सुगांगप्रासादः। शनैः शनैरारोढुमर्हत्यार्यः। चाण०। नाट्येनारु

म्यावलोक्य च। सहर्षमात्मगतं। अये सिंहासनमध्यास्ते वृषलः। साधु २॥ नंदैर्विमुक्तमनपेक्षितरा
जराजैरध्यासितं च वृषलेन वृषेण राज्ञां॥ सिंहासनं सदृशपार्थिवसंगतं च प्रीतिं त्रयस्त्रिगुणयं
ति गुणा ममैते॥ २३॥ उपसृत्य। विजयतां वृषलः। राजा॥ सिंहासनादुत्थाय चाणक्यस्य पादौ गृहीत्वा।
आर्य चंद्रगुप्तः प्रणमति। चाण०। पाणौ गृहीत्वा। उत्तिष्ठोत्तिष्ठ वत्स॥ आशैलेंद्राच्छिलांतःस्खलि
तसुरधुनीसीकरासारशीतादातीरान्नैकरागस्फुरितमणिरुचो दक्षिणस्यार्णवस्य॥ आगत्या
गत्य भीतिप्रणतनृपशतैः शश्वदेव क्रियंतां चूडारत्नांशुगर्भास्तव चरणयुगस्यांगुलीरंध्रभा
गाः॥ २४॥ राजा। आर्यप्रसादादनुभूयत एवैतन्नाशास्यं मे। उपविशत्वार्य इति यथासनमुपवि
ष्टौ। चाण०। वृषल किमर्थं वयमाहूताः। राजा॥ आर्यस्य दर्शनेनात्मानमनुग्रहीतुं। चाण०। स्मितं

65

हसा। वृषल अलमनेन प्रश्रयेण न निष्प्रयोजनमधिकारवंतः प्रभुभिराहूयंते तत्प्रयोजनमभि
धीयतां। राजा। आर्य कौमुदीमहोत्सवप्रतिषेधस्य किं फलमार्यः पश्यति। चाण०। स्मितं कृ
त्वा। वृषल उपालब्धुं तर्हि वयमाहूताः। राजा। आर्य नोपालब्धुं किं तर्हि विज्ञापयितुं। चाण०। वृ
षल यद्येवं तर्हि विज्ञापनीयानामवश्यं शीष्येण रुचयो नावरोद्धव्याः। राजा। आर्य कः संदेहः किं
तु न कदाचिदपि आर्यस्य निष्प्रयोजना रुचिः प्रवर्तिष्यत इति अस्ति नः प्रश्नस्यावकाशः। चाण०
वृषल सम्यग्गृहीतवानसि। न प्रयोजनमनपेक्ष्यमाणः स्वप्नेपि चाणक्यश्चेष्टिष्यते। राजा। आ
र्य अत एव मां प्रयोजनशुश्रूषा मुखरयति। चाण०। वृषल श्रूयतां। इह खल्वर्थशास्त्रकारास्त्रि
विधां सिद्धिमुपवर्णयंति। तद्यथा। राजायत्तां सचिवायत्तामुभयायत्तां चेति। तत्सचिवायत्तसि ३४



द्वेर्भवतः किमन्वेषणप्रयोजनं वाङ्मनसयोः खेदमुत्पादयितुं वयमेवात्राप्तिनियुक्तावेत्स्याम॥
राजा॥ सकोप इव मुखं परिवर्त्तयति। ततो नेपथ्ये वैतालिकौ पठतः॥ आकाशं काशलूनच्छविमपि
भवता भस्मना उद्धूलयन्ती शीतांशोरंशुजालैर्जलधरमलिनां क्लिश्नती कृत्तिमैभीं॥ कापालीमु
द्वहन्ती स्रजमिव धवलां कौमुदीमित्यपूर्वा हासश्रीराजहंसा हरतु तनुरिव क्लेशमैशी शरद्वः॥७०॥
अपि च॥ प्रत्ययोन्मेषजिह्मा क्षणमनभिमुखी रत्नदीपप्रभाणामात्मव्यापारगुर्वी जनितजलल
वाजड्यणैः सांगभंगैः॥ नागांकमोक्तुमिच्छोः शयनमुरुफणाचक्रवालोपधानं निद्राछेदाभिता
म्राचिरमवतु हरेर्दृष्टिराकेकरा वः॥७१॥ द्वितीयः॥ सत्वोत्कर्षस्य धात्रा निधय इव कृताः केपि कस्या
पि हेतोर्जेतारः स्वेन धाम्ना मदसलिलमुचां नागयूथेश्वराणां॥ दंष्ट्रापर्यंगं मृगाणामधिपतय इव

=किंचित्लुंचमुखपांगाद्दृष्टिरर्धनिमेषिणी॥ पथ्यप्रथेवान्यनेत्रान्मुकुस्तारा विवर्त्तिनी॥ आकेकरा दुरालोके स्यात् द्विछेदे च वस्तुनि॥=२

यत्वमानावलेपानाज्ञाभंगंसहंतेनृवरनृपतयस्त्वादृशाःसार्वभौमाः॥७२॥अपिच॥भूषणाद्यु
पभोगेनप्रभुर्भवतिनप्रभुः॥परैरपरिभूताज्ञस्त्वमिवप्रभुरुच्यते॥७३॥चाण०॥आकर्ण्यात्म
गतं।प्रथमंतावद्विशिष्टदेवतारूपकेणप्रवृत्तराजगुणवर्णनमाशीर्वचनं।इदमपरंकिमितिना
वधारयामि।विचिंत्य।आंभवतुज्ञातं।राक्षसस्यायंप्रयोगः।दुरात्मन्राक्षसहतकदृश्यसेजा
गर्तिखलुकौटिल्यः।राजा।वैहीनरेदीयतामाभ्यांवैतालिकाभ्यांसुवर्णशतसहस्रं।कंचु०।यदा
ज्ञापयतिदेवइत्युत्थायपरिक्रामति।चाण०।सक्रोधं।वैहीनरेतिष्ठ२नगंतव्यं।वृषल२किमयम
स्थानएवमहानर्थोत्सर्गः क्रियते।राजा०।आर्येणैवंसर्वतोनिरुद्धचेष्टाप्रसरस्यबंधनमिवमे
राज्यंराज्यमिवन।चाण०।वृषलस्वयमनभियुक्तानांराज्ञामेतेदोषाभवंतितद्यदिनसहसेत

३५

68

त्वयमेवाभियुज्यन्त्वा।राजा।एतेवयंस्वकर्मण्यभियुज्यामहे।चाण०।प्रियंनः२वयमपिस्वक
र्मण्यभियुज्यामहे।राजा।यद्येवंतर्हिकौमुदीमहोत्सवप्रतिषेधस्यैवतावत्प्रयोजनंश्रोतुमिच्छा
कौमुदी मि।चाण०।वृषलँमहोत्सवानुष्ठानस्यकिंप्रयोजनमितिश्रोतुमिच्छामि।राजा।प्रथमंतावन्म
माज्ञाघातः।चाण०।वृषल२ममापिखलुत्वदाज्ञाव्याघातएवकौमुदीमहोत्सवँस्यप्रयोजनमि प्रतिषेध
ति।कुतः।।अंभोधीनांतमालप्रभवकिसलयश्यामवेलावनानामापारेभ्यश्चतुर्णांचटुलति
मिकुलक्षोभितांतर्जलानां।।मालेवाम्लानपुष्पातवनृपतिशतैरुह्यतेया।शिरोभिःसामय्येव
स्खलंतीकथयतिविनयालंकृतंतेप्रभुत्वं।।७।।राजा।अथापरमपिप्रयोजनंयत्तच्छ्रोतुमि
च्छामि।चाण०।तदपिकथयामि।राजा।कथ्यतां।चाण०।शोणोत्तरेमद्वचनात्कायस्थमचलंब्रूहि



यत्तद्भद्रभटप्रभृतीनांलेख्यपत्रंतत्तावद्दीयतामिति। प्रती०। जंअज्जोआणवेदिइतिनिष्क्रम्यपु
नःप्रविश्य। अज्जएदंपत्तं। चाण०। गृहीत्वावृषलश्रूयतां। राजा। दत्तावधानोस्मि। चाणक्योवाच
यति। सुगृहीतनामधेयस्यचंद्रगुप्तस्यसहोत्थायिनांप्रधानपुरुषाणामितोपक्रम्यवध्यंमलय
केतुमाश्रितानांपरिमाणलेख्यं। तत्रप्रथमंतावद्गजाध्यक्षोभद्रभटः। अश्वाध्यक्षःपुरुषदत्तः। म
हाप्रतीहारस्यचंद्रभानोर्भागिनेयोहिंगुरातः। देवस्यस्वजनगंधीमहाराजबलगुप्तः। देवस्यैवकु
मारसेवकोराजसेनः। सेनापतेःसिंहबलस्यकनीयान्भ्राताभागुरायणः। मालवराजपुत्रोरोहि
ताक्षः। क्षत्रगुणमुख्यतमोविजयवर्मेतिएवमेतत्सत्रं। राजा। आर्यएतेषामपरागहेतून्श्रोतु
मिच्छामि। चाण०। वृषलश्रूयतां। अत्रयावेतौगजाध्यक्षाश्वाध्यक्षौभद्रभटपुरुषदत्तनामानौ ३६

70



तौस्त्रीमद्यमृगयाशीलौहस्त्यश्वान्वेषणेह्यनभियुक्तावित्यधिकाराभ्यामपहृत्यस्वजीवनमात्रे
णैवस्थापितावित्यपरक्तौस्वेनस्वेनचाधिकारेणमलयकेतुमाश्रितौ।हिंगुरातबलगुप्तौतावप्य
त्यंतलोभाभिभूतत्वाद्दत्तंधनमबहुमन्यमानौतत्रबहुलभ्यतइतिमलयकेतुमाश्रितौ।योप्य
सौभवतःकुमारसेवकोराजसेनइतिसोपितवप्रसादादतिप्रभूतंकोशंहस्त्यश्वंसहसैवसुमह
दैश्वर्यंप्राप्यपुनरुछेदाशंकयाऽपक्रम्यमलयकेतुमाश्रितः।योयमपरःसेनापतेःसिंहबलस्यके
नीयान्भ्राताभागुरायणःअसावपितत्रकालेपर्वतकेनसहसमुत्पन्नसौहार्दस्तत्प्रीत्याचपिता
तेचाणक्येनघातितइतिरहसित्रासयित्वामलयकेतुमपवाहितवान्।ततोभवदपथ्यकारिषुचं
दनदासप्रमुखेषुनिगृह्यमाणेषुस्वदोषाशंकयापरिक्रम्यमलयकेतुमाश्रितः।तेनाप्यसौममाने

नप्राणाःपरिरक्षिताइतिकृतघ्नतामनुवर्त्तमानेनपैटकंचपरिचयमासन्नोनंतरममात्यपदंया
हितः।यावेतौरोहिताक्षविजयवर्म्माणौतावप्यत्यंतमानित्वात्त्वदायादेभ्यस्त्वयामानंदीयमानम
सहमानौमलयकेतुमाश्रितौ।इत्येषामपरागहेतवः।राजा।आर्यएवमेतेषुविज्ञातापरागहेतुषु
क्षिप्रमेवकस्मान्नप्रतिविहितमार्येण।चा०वृषलनपारितंप्रतिविधातुं।राजा।किमकौशलादुत
प्रयोजनापेक्षया।चाण०कथमकौशलंभविष्यतिनियतंप्रयोजनापेक्षया।राजा।प्रयोजनम
प्रतिविधानस्यश्रोतुमिच्छामि।चाण०वृषलश्रूयतामवधार्यतांच।राजा।उभयमपिक्रियतेकथ्य
तां।चाण०इहखलुविरक्तानांप्रकृतीनांद्विविधंप्रतिविधानं।तद्यथा।ऽनुग्रहोनिग्रहश्च।अनुग्र
हस्तावदाक्षिप्ताधिकारयोर्भद्रभटपुरुषदत्तयोःपुनरधिकारारोपणमेव।अधिकारश्चपुन

स्तादृशेष्वारोप्यमाणःसकलमेवराज्यस्यमूलंहस्त्यश्वमवसादयति।हिंगुरातबलगुप्तयोरत्यं
तलुब्धप्रकृतिकयोःसकलराज्यसंप्रदानेनाप्यपरितुष्यतोरनुग्रहःकेचुंनत्राकयते।राजसेन
भागुरायणयोस्तुधनप्राणनाशभीतयोःकुतोनुग्रहस्यावकाशइति।लोहिताक्षविजयवर्म
णोरपिदायादमानप्रदानपीडितयोरत्यंतमानिनोर्मानमप्यमानंमन्यमानयोःकीदृशोनुग्रहः
प्रीतिंजनयिष्यति।इतिपरिहृतःपूर्वःपक्षः।उत्तरोपिखलुवयमचिरादधिगतनंदैश्वर्याःसहोत्था
यिनंप्रधानपुरुषवर्गमुग्रेणदंडेनपीडयंतोनंदकुलानुरक्तानांप्रकृतीनामविश्वास्यामाभूमेत्य
तःपरिहृतएव।तदेवमुपगृहीतास्मत्कृत्यपक्षोराक्षसोपदेशप्रवणोमहीयसाम्लेच्छबलेनपरि
वृतःपितृवधामर्षितःपर्वतकपुत्रोमलयकेतुरस्मानभियोक्तुमुद्यतइतिसोयंव्यायामका

लोनोत्सवकाल इत्यतो दुर्गसंस्कारे प्रारब्धव्ये किं कौमुदीमहोत्सवेनेति प्रतिषिद्धः।राजा।आर्यबहु
प्रष्टव्यमत्र।चाण०।वृषलविश्रब्धंपृच्छममापिबह्वाख्येयमत्र।राजा।एषपृच्छामि।चाण०।अहम
प्येषकथयामि।राजा।योयमस्माकमस्यसर्वस्यैवानर्थस्यहेतुर्मलयकेतुःसकस्मादार्येणापक्रा
मन्नुपेक्षितः।चाण०।वृषलअनपक्रमणेद्वयीगतिःस्यात्।अनुगृह्येतनिगृह्येतवा।अनुग्रहेताव
त्पूर्वंप्रतिश्रुतंराज्यार्द्धंप्रतिपाद्येतवा।निग्रहेतावदस्यपितापर्वतकोस्माभिर्व्यापादितइतिकृतघ्न
तायाःस्वयंहस्तोदत्तःस्यादिति।प्रतिश्रुतार्द्धराज्यप्रतिपादनेपिपर्वतकविनाशःकेवलंकृतघ्नत ३८
मात्रफलःस्यादितिमलयकेतुरपक्रामन्नुपेक्षितः।राजा।अत्रतावदेवं।राक्षसःपुनरिहैवांत
र्नगरेवर्त्तमानआर्येणैवोपेक्षितइत्यत्रकिमुत्तरमार्यस्य।चाण०।वृषलराक्षसोपिखलुस्वा

मिनिस्थिरानुरागत्वात्सुचिरमेकत्रसंवासाच्चशीलज्ञानांनंदानुरक्तानांप्रकृतीनामत्यंतविश्वा
स्यः प्रज्ञापुरुषकाराभ्यामुपेतः सहायसंपदा युक्तः कोशवानिहैवांतर्नगरे वर्त्तमानो महांतमंतः
प्रकोपमुत्पादयेत्। दूरीकृतस्तु बाह्यकोपमुत्पादयन्नपि दुःसाध्यो भविष्यत्यतोपक्रामन्नुपे
क्षितः। राजा। तत्किमिहस्थएवोपायैर्नोपक्रांतः। चा० कथमुपक्रांतो भविष्यति। ननूपायैरेवासौ
हृदये शल्यः शंकुरिवोद्धृत्य दूरीकृतः। दूरीकरणस्य चोक्तं प्रयोजनं। राजा। आर्य कस्माद्विक्रम्य न
सो गृहीतः। चाण०। वृषल राक्षसोसौ विक्रम्य गृह्यमाणः स्वयं वा विनश्येद्युष्मद्बलानि वा विनाशयेत्।
एवं सत्युभयथापि दोषः। पश्य। स हि भृशमुपयुक्तो यद्युपेयाद्विनाशं ननु वृषल वियुक्तस्तादृशो
नासि पुंसा॥ अथ तव बलमुख्यान्नाशयेत्सापि पीडा वनगज इव तस्मात्सोभ्युपायैर्विनेयः॥७५॥

राजा।नखल्वार्यक्रमोऽयमार्यस्यवाचावाचमतिशयितुं।सर्वथाऽमात्यराक्षसएवात्रप्रशस्यतरः।चाण०।
नभवानितिवाक्यशेषः।मातावत्।भोवृषलतेनकिंकृतं।राजा।यदिनज्ञायतेतदाश्रूयतां।येनख
लुमहात्मना॥लब्धायांपुरियावदिष्टमुषितंकृत्वापदंनोगलेव्याघातोजयघोषणादिषुबलाद
स्मद्बलानांकृतः॥अत्यर्थंविपुलैःसुनीतिविभवैःसंमोहमापादिताविश्वास्येष्वपिविश्वसंतिमत
योनस्वेषुवर्गेषुनः॥२६॥चाण०।विहस्य।वृषलएतत्कृतंराक्षसेन।राजा।एतत्कृतममात्यराक्षसे
न।चाण०।वृषलमयापुनर्ज्ञातंनंदमिवभवंतमुद्धृत्यभवानिवभूतलेमलयकेतुरपिराजाधिरा
जपदमारोपितः।राजा।एतत्कृतंदैवेनकिमत्रार्यस्य।चाण०।हेमत्सरिन्॥आरुह्यारूढकोपस्फु ३०
रणविषमिताग्रांगुलीमुक्तचूडांलोकप्रत्यक्षमुग्रांसकलरिपुकुलोच्छेददीर्घांप्रतिज्ञां॥केनान्ये

नावलिप्तानवनवतिशतद्रव्यकोटीश्वरास्तेनंदाःपर्यायभूताःपशवइवहताःपश्यतोराक्षसस्य
॥७७॥अपिच॥गृध्रैराबद्धचक्रंवियतिवलनयादीर्घनिष्कंपपक्षैधूमैर्ध्वस्तार्कभासांसघनमिव
दिशांमंडलंदर्शयंतः॥नंदानानंदयंतःपितृवननिलयान्प्राणिनःपश्यचैतान्निर्वांत्यद्यापिनैते
स्नुतबहलवसावाहिनोहव्यवाहाः॥७८॥राजा॥नंदकुलद्वेषिणादैवेनेदमनुष्ठितं।चाण॰।दैवमवि
द्वांसःप्रमाणयंति।राजा॥विद्वांसोप्यविकत्थनाभवंति।चाण॰।क्रोधंनाटयन्।वृषल२भृत्यमिव
मामारोढुमिच्छसि॥शिखांबद्धांमोक्तुंममपुनरयंधावतिकरः।भूमौपादप्रहारंकृत्वा।प्रतिज्ञामा
रोढुंपुनरपिचलत्येषचरणः॥प्रणाशान्नंदानांप्रशममुपयातंत्वमधुनापरीतःकालेनज्वलय
सिपुनःक्रोधदहनं॥७९॥राजा॥सावेगमात्मगतं।अयेतत्कथंसत्यमेवार्यःकुपितः।तथाहि॥

संरंभस्पंदिपक्ष्मक्षरदमलजलक्षालनक्षामयापिभ्रूभंगोद्भेदजिह्मंज्वलितमिवपुनःपिंगया
नेत्रभासा॥मन्येरुद्रस्यरौद्रंसममभिनयतस्तांडवेसंस्मरंत्यासंजातोग्रप्रकंपंकथमपिधरया
धारितःपादघातः॥२९॥चाण०कृतककोपंसंहृत्य।वृषल२अलमुत्तरोत्तरेणयद्यस्मत्तोवरी
यान्राक्षसोवगम्यतेतस्मादिदंशस्त्रंतस्मैदीयतामितिशस्त्रमुत्सृजति।उत्थायप्रत्यक्षवदाका
शेलक्ष्यंबध्वा।स्वगतं।राक्षस२एषभवतःकौटिल्यबुद्धिविजिगीषोर्बुद्धेःप्रकर्षः॥चाणक्यतश्च
लितभक्तिमहंसुखेनजेष्यामिमौर्यमितिसंप्रतियःप्रयुक्तः॥भेदःकिलैषभवतासकलःसए
वसंपत्स्यतेशठतवैवहिदूषणाय॥३०॥इतिनिष्क्रांतश्चाणक्यः।राजा।आर्यवैहीनरेऽद्यप्रभृति
अनादृत्यचाणक्यंचंद्रगुप्तःस्वयमेवराज्यकार्याणिकरिष्यतीतिगृहीतार्थाःप्रकृतयःक्रियंतां।

कंचु०।स्वगतं।कथंनिरुपपदमेवचाणक्योनार्यचाणक्यइति।हंतसत्यमेवहृतोधिकारः।अथवान
खल्वत्रवस्तुनिदैवदोषमवगंतुमर्हामि॥सदोषःसचिवस्यैवयदसत्कुरुतेनृपः॥यातियंतुःप्रमा
देनगजोव्यालत्ववाच्यतां॥८२॥राजा।आर्यकिंविचारयसि।कंचु०।नकिंचिद्विचारयामि।किंत्वेत
द्विज्ञापयामि।दिष्ट्यादेवइदानींदेवःसंवृत्तइति।राजा।आत्मगतं।एवमस्मासुनिगृह्यमाणेषुस्व
कार्यसिद्धिकामःसकामोभवत्वार्यः।प्रकाशं।शोणोत्तरेऽनेनशुष्ककलहेनशिरोवेदनामांबाधतेऽ
तःशयनगृहमादेशय।प्रती०।एदु२महाराओ।राजा।आसनादुत्थायात्मगतं॥आर्याज्ञयैवमम
लंघितगौरवस्यबुद्धिःप्रवेष्टुमवनेर्विवरंप्रवृत्ता॥येसत्यमेवनगुरुंप्रतिमानयंतितेषांकथंनुहृ
दयंनभिनत्तिलज्जा॥८३॥ ॥इतिनिष्क्रांताःसर्वेतृतीयोंकः॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥

॥ततःप्रविश्याध्वगवेषधारीपुरुषः२हीमाणहे।जोअणसअंसमधिअंकोणामगआगअंइदक
रेज्ज॥अद्धाणगमणगुरुईपहुणोअमाजइणहोज्ज॥टन॥ताजावअमच्चरक्खसस्सज्जेव्वगेहं
गच्छामि।परिश्रांतवत्परिक्रम्य।कोएत्थदोवारिआणंणिवेदेदुदावभट्टिणोअमच्चरक्खसस्सएसो
करहकोकरहक्कोविअतुवरंतोपाडलिउत्तादोआअदोत्ति।प्रविश्यदोवारिकः।भद्द२माउच्चैंमंते
हि।एसोक्खुभट्टाअमच्चरक्खसोकज्जचिंताजणिदेणजाअरेणसमुप्पण्णसीसवेअणोअज्जवि
दावेणसअणअलंमुंचेदि।ताचिठ्ठमुहुत्तअंजावसेलद्धावसरोसविअपभवदागमणंणिवेदेमि।
पुरु०।भद्दमुहएवंकरेम्ह।ततःप्रविशतिशयनगतआसनगतेनशकटदासेनसहसचिंतोराक्ष
सः२।आत्मगतं।ममविमृशतःकार्यारंभेविधेरविधेयतांसहजकुटिलांकौटिल्यस्यप्रचिंतय

७२

तोमतिः॥अथचविहितेतत्कृत्यानांनिकाममुपग्रहेकथमिदमिहेत्युन्निद्रस्यप्रयांत्यनिशंनिशाः॥२॥
अपिच॥कार्योपक्षेपमादौतनुमपिरचयंस्तस्यविस्तारमिच्छन्बीजानांगर्भितानांफलमतिग
हनंगूढमुद्भेदयंश्च॥कुर्वन्बुध्याविमर्शंप्रसृतमपिपुनःसंहरन्कार्यजातंकर्त्तावानाटकानामि
ममनुभवतिक्लेशमस्मद्विधोवा॥३॥तदपिदुरात्माचाणक्यबटुः।उपसृत्यदौवारिकः।जअदु२
राक्ष०।अभिसंधातुंशक्यःस्यात्।दौवा०।अमच्च।राक्ष०।वामाक्षिस्पंदंसूचयित्वा।चाणक्यबटुर्ज
यतुअभिसंधातुंशक्यःस्यादमात्यराक्षसइ×कवसो×ति।प्रकाशं।भद्रकिमसिवक्तुकामः।दौवा०।
अमच्चएसोकरहअपाडलिउत्तादोआअदोइच्छदिअमच्चंपेक्खिदुं।राक्ष०।क्षिप्रंप्रवेशयैनं।दौ
वा०।जंअमच्चोआणवेदिइतिनिष्क्रम्यपुरुषमुपसृत्य।भद्दएसोअमच्चोचिट्ठदिताउवसप्पणं।

इतिनिष्क्रांतोदौवारिकः।करभकः।राक्षसमुपसृत्य।जअदु२अमच्चो।राक्ष०।नाद्देनावलोक्य।भद्र
करभकस्वागतमुपविश्यतां।कर०।जंअमच्चोआणवेदि।इतिभूमावुपविशति।राक्ष०।स्वगतं।अथ
कस्मिन्प्रयोजनेमयाप्रणिधिःप्रहितइतिप्रभूतत्वात्प्रयोजनानांनखल्ववधारयामि।चिंतांनाट
यति।ततःप्रविशतिवेत्रपाणिरपरःपुरुषः२।ओसलधअज्जाओसलध।अवेहमाणवेअवेह।ता
किंणपेक्खध॥दूरेपच्चासत्तीदंसणमविदुल्लहंअधण्णेहिं॥कल्लाणकुलहराणंदेवाणंव्वमिदेवाणं।१०॥
आकाशे।अज्जाकिंभणध।किंणिमित्तंओसालणाकलीअदि।अज्जाएसोक्खुकुमालोमलअके
दूसमुप्पण्णसीसवेअणंअमच्चलक्खसंपेक्खिदुंइदोज्जेव्वआअच्छदि।ताएदिणाकालणेणओ
सालणाकलीअदि।इतिनिष्क्रांतःपुरुषः।ततःप्रविशतिभागुरायणेनसहकंचुकिनाऽनुगम्यमा

४२

नोमलयकेतुः२।निश्वस्यात्मगतं।अद्यदशमोमासस्तातस्योपरतस्य।नचास्माभिर्वृथापुरु
षाभिमानमुद्वहद्भिस्तमुद्दिश्यतोयांजलिरप्यावर्जितः।अथवाप्रतिज्ञातमेवैतत्पुरस्तात्।वक्षस्ता
डनभिन्नरत्नवलयंभ्रष्टोत्तरीयांशुकंहाहेत्युच्चरितार्तनादकरुणंभूरेणुरूक्षालकं॥तादृङ्मातृज
नस्यशोकजनितंसंप्रत्यवस्थांतरं।शत्रुस्त्रीषुमयाविधायगुरवेदेयोजलस्यांजलिः॥५॥तत्किमिह
बहुना॥उद्यच्छताधुरमकापुरुषानुरूपांगंतव्यमाजिनिहतेनपितुःपश्चावा॥आछिद्यवास्वजननीनि
जनलोचनेभ्योनेयोमयारिपुवधूनयनानिबाष्पः॥६॥प्रकाशं।आर्यजाजलेउच्यंतामस्मद्वच
नादनुयायिनोराजानः।एकएवाहममात्यराक्षसस्यातर्कितागमनेनप्रीतिमुत्पादयितुमिच्छामि।
अतःकृतमनुगमनक्लेशेनेति।कंचु०।यदाज्ञापयतिकुमारः।परिक्रम्याकाशे।भोभोराजानःकुमा



रः समाज्ञापयति न खल्वहं केनचिदनुगंतव्य इति। विलोक्य सहर्षं। कुमार एते खलु कुमारस्याज्ञा
समनंतरमेव निवृत्ताः सर्व एव राजानः॥ पश्यतु हि कुमारः॥ सोत्सेधैः स्कंधदेशैः खरकविकक
षाकर्षणात्पर्यक्षुन्नैरश्वाः कैश्चिन्निरुद्धाः खमिव खुरपुटैः खंडयंतः पुरस्तात्॥ कैश्चिन्मातंग
मुख्यैर्विहतजवतया मूकघंटैर्निवृत्तं मर्यादां भूमिपाला जलधय इव ते देव नोल्लंघयंति॥ ७॥ मल०
आर्य त्वमपि सपरिजनो निवर्त्तस्व भागुरायण एवैको मामनुगच्छतु। कंचु० यदाज्ञापयति कुमार
इति निष्क्रांतः। राजा। सखे भागुरायण विज्ञापितोहमिहागच्छद्भिर्भद्रभटप्रभृतिभिर्यथा न वयम
मात्यराक्षसद्वारेण कुमारमाश्रयामहे किंतु कुमारस्य सेनापतिं शिखरसेनं द्वारीकृत्य दुष्टामात्य
परिग्रहीताच्चंद्रगुप्तादपरक्ताः कुमारमाभिरामिकगुणयोगादाश्रयणीयमाश्रयामहे इति। तन्न

४३



मयासुचिरमपिविचारयतातेषांवाक्यार्थोधिगतः।भागु०।कुमारनैवायमत्यंतदुर्बोधोर्थः।पश्यवि
जिगीषुमात्मगुणसंपन्नंप्रियहितद्वारेणाश्रयणीयमाश्रयेदितिन्यायएवायं।राजा।सखेभागुरा
यणनन्वस्माकममात्यराक्षसःप्रियतमोहिततमश्चेति।भागु०।कुमारएवमेतत्।किंत्वमात्यराक्षस
श्चाणक्येबद्धवैरोनचंद्रगुप्ते।तद्यदिकदाचिच्चंद्रगुप्तश्चाणक्यमतिजितकाशिनमसहमानःसाचि
व्यादवरोपयेत्ततोनंदकुलस्यभक्त्यानंदान्वयएवायमितिसंयतसुहृज्जनापेक्षयाचामात्यराक्षस
श्चंद्रगुप्तेनसहसंदधीत।चंद्रगुप्तोपिपितृपारंपर्यागतएवायमितिकृत्वासंधिमनुमन्येत।एवंसत्य
स्मास्वपिकुमारोनविश्वसेदित्ययमेषांवाक्यार्थः।मलय०।युज्यते।अमात्यराक्षसस्यगृहमादेश
य।भागु०।इतइतःकुमारः।इदममात्यराक्षसस्यगृहंप्रविशतुकुमारः।मलय०।एषप्रविशामि।

85

इतिप्रवेशंनाटयतः।राक्ष०।स्मृत्वाप्रकाशं।भद्रअपिदृष्टस्त्वयाकुसुमपुरेवैतालिकःस्तनकलशः।
पुरुषः।अमच्चअधइं।मलय०।सखेभागुरायणकुसुमपुरवृत्तांतोवर्त्ततेतन्नस्तावन्नोपसर्पावः।श्रु
णुवस्तावत्।किंकारणमिति।।सत्वभंगभयाद्राज्ञांकथयंत्यन्यथापुरः।।अन्यथाविवृतार्थेषुस्वैरा
लापेषुमंत्रिणः।।४९।।भागु०।यदाज्ञापयतिकुमारः।राक्ष०।भद्रअपितत्कार्यंसिद्धं।पुरु०।अमच्चप्पसा
एणसिद्धं।मलय०।सखेभागुरायणकिंतत्कार्यं।भागु०।कुमारगहनःसचिववृत्तांतोनैतावतापरिछे
त्तुंशक्यते।अवहितस्तावद्भवतुकुमारः।राक्ष०।भद्रविस्तरेणश्रोतुमिच्छामि।सुणादुअमच्चो।
अत्थिदावअहंअमच्चेणआणत्तोजधाकरभअकुसुमउरंगच्छिअभणिदव्वो×पुरु०×ममवअ ४८
णेणतुएवैतालिअथणकलसो।जधाचाण[illegible]दएणतेसुतेसुआणाभंगेसुअणुचिट्ठीअमा

णेहिं चंदउत्तो लुए समुत्तेअणसमत्थेहिं सिलोएहिं उवसिलोअइदव्वोत्ति। राक्ष०। ततस्ततः। पुरु०।
तदो मए पाडलिउत्तं गच्छिअ सुणाविदो अमच्चस्स संदेसं वैतालिअथणकलसो। राक्ष०। ततस्त
तः। पुरु०। एत्थंतरेण णंदकुलविणासदुम्मिदस्स पोरजणस्स परिओसं समुप्पाअअंतेण चंदउत्ते
ण आघोसिदो कौमुदीमहूसवो। सोअ चिरकालपवट्टमाणजणिदपरिओसो अभिमदबहुजण
समागमो विअ ससिणेहं बहुमाणिदो णअरजणेण। राक्ष०। सबाष्पं। हा देव नंद॥ कौमुदी कुमुदा
नंदे जगदानंदहेतुना॥ कीदृशी सति चंद्रे पि नृपचंद्र त्वया विना॥७३॥ अपि च ततस्ततः। पुरु०। तदो सो
लोअणाणंदभूदो अणिच्छंतस्स ज्जेव णअरणंजेस्स णिवारिदो चाणक्कहदएण। एत्थंतरे थण
अलसेण पउत्ता चंदउत्तस्स समुत्तेअणसमत्था सिलोअपरिवाडी। राक्ष०। सहर्षं। साधु सखे

87



स्तन कलज्ञासाधु। काले भेदबीजमुप्तमवश्यं फलमुपदर्शयिष्यति। कुतः। सद्यः क्रीडारसच्छेदं प्रा
कृतोपि न मर्षयेत्॥ किं नु लोकाधिकं तेजो बिभ्राणः पृथिवीपतिः॥ ७ना। मलय॰ एवमेतत्। सद्यः क्री
डेत्यादि पुनः पठति। राक्ष॰ ततस्ततः। पुरु॰ अमच्च तदो चंदउत्तेण आणाभंग कलुसिदहिअएण सु
इरं अमच्चगुणे पसंसिअ अवक्किसिओ अहिआरादो चाणक्कहदओ। मलय॰ एवमेष दर्शितिश्चं
द्रगुप्तेन राक्षसे भक्तिपक्षपातः। भागु॰ कुमार न तथा गुणप्रशंसया यथा चाणक्यबटोर्निराकर
णेन। राक्ष॰ भद्र किमयमेवैकः कौमुदीमहोत्सवप्रतिषेधश्चंद्रगुप्तस्य चाणक्यं प्रति कोपकारण
मुतान्यदप्यस्ति। मल॰ सखे भागुरायण चंद्रगुप्तस्य कोपकारणान्वेषणे किं फलमेष पश्यति। भा
गु॰ कुमार एतत्फलं पश्यति। मतिमांश्चाणक्यस्तुच्छप्रयोजनेनैव चंद्रगुप्तं कोपयिष्यति। न चकृ

तवेदी चंद्रगुप्तएतावतागौरवमुल्लंघयिष्यति। सर्वथाचाणक्यचंद्रगुप्तयोः पुष्कलापराधकारणा
द्योविश्लेषउत्पद्यतेसआत्यंतिकोभवतीति। पुरु० अमच्च अत्थि अण्णाइं पि चंदउत्तस्सकोवकार
णाइं। राक्षसः। किंकिं। पुरु० उवेक्खिदोणेण अवक्कमंतोकुमारोमलअकेदू अमच्चरक्खसोत्ति।
राक्ष० सहर्षं। सखेशकटदासहस्ततलगतःसंप्रतिचंद्रगुप्तोभविष्यति। शकट० इदानींचं
दनदासस्यबंधनान्मोक्षस्तवचपुत्रदारैःसहसमागमःजीवसिद्धिप्रभृतीनांक्लेशछेदः। भागु०
स्वगतं। सत्यंजीवसिद्धिप्रभृतीनांक्लेशछेदः। मलय० सखेभागुरायणहस्ततलगतोमेसंप्रति
चंद्रगुप्तोभविष्यतीतिव्याहरतःकोस्याभिप्रायः। भागु० किमन्यत्। चाणक्यादपकृष्टस्यचंद्रगु
प्तस्योद्धरणेसौकर्यमेवसंपश्यति। राक्ष० भद्रहृताधिकारःसांप्रतंक्वासौबटुः। पुरु० अमच्चतं

दिंजेवपाडलिउत्तेपडिवसदि।राक्ष०।सावेगं।भद्रतत्रैवप्रतिवसतिनतपोवनंगतः।प्रतिज्ञांवानपु
नःसमारूढवान्।पुरु०।अमच्चतवोवणंगमिस्सदित्तिसुणीअदि।राक्ष०।शकटदासनेदमुपपद्य
ते॥देवस्ययेनपृथिवीतलवासवस्यसाग्रासनापनयजानिकृतिर्नसोढा॥सोयंस्वयंकृतनराधिप
तेर्मनस्वीमौर्यात्कथंनुपरिभूतिमिमांसहेत॥४५॥मल०।सखेभागुरायणचाणक्यस्यतपोवनगम
नेपुनःप्रतिज्ञारोहणेचकास्यस्वार्थसिद्धिः।भागु०।कुमारनायमत्यंतदुर्बोधोर्थः।यावच्चाणक्यहत
कश्चंद्रगुप्ताद्दूरीभवतितावदस्यकार्यसिद्धिः।चाक०।अमात्यालमन्यथाविकल्पैः।एतदुपपद्यतेए
व।पश्यत्वमात्यः।राज्ञांचूडामणीन्दुद्युतिखचितशिखेमूर्ध्निविन्यस्तपादःस्वैरेवोत्पाद्यमानंकि
मितिविषहतेमौर्यआज्ञाविघातं॥कौटिल्यःकोपनोपिस्वयमभिचरणेज्ञातदुःखःप्रतिज्ञांदै

वात्पूर्णप्रतिज्ञः पुनरपि न करोत्युपायमिति ग्लानिमीतः ॥१६॥ राक्ष० शकटदास एवमेतत्। तद्गच्छ
विश्रामय करभकं। शक० यदाज्ञापयत्यमात्य इति करभकेण सह निष्क्रांतः। राक्ष० अहमपि कु
मारं द्रष्टुमिच्छामि। मलय० अहमेवार्यं द्रष्टुमागतः। राक्ष० नाट्येनावलोक्य। अये कुमार एवाग
तः। आसनादुत्थाय। इदमासनमुपवेष्टुमर्हति कुमारः। मल० अयमुपविशामि उपविशत्वमा
त्यः। यथासनमुपविष्टौ। मलय०। आर्य अपि सह्या शिरोवेदना। राक्ष० कुमारस्याधिराजशब्दे
नातिरस्कृते कुमारशब्दे कुतः शिरोवेदनायाः सह्यता। मलय० उरीकृतमेतदमात्येन न दुः
शापं भविष्यति। तत्कियंतं कालमस्माभिरेवं संभृतबलैरपि शत्रुव्यसनमपेक्षमाणैरुदा
सितव्यं। राक्ष०। कुतोद्यापि कालहरणस्यावकाशः। प्रतिष्ठस्व विजयाय। मलय०। अमात्य

अपिशत्रोर्व्यसनमुपलब्धं।राक्ष०।बाढमुपलब्धं।मलय०।कीदृशं।राक्ष० सचिवव्यसनंकिमन्य
त्।अपकृष्टश्चाणक्याश्चंद्रगुप्तः।मलय०।अमात्यसचिवव्यसनमव्यसनमेव।राक्ष०।कुमारा
न्येषांभूपतीनांकदाचिदमात्यव्यसनमव्यसनंस्यान्नपुनश्चंद्रगुप्तस्य।मलय०।आर्यविशेष
तोनतुचंद्रगुप्तस्येति।राक्ष०।किंकारणं।मलय०।चंद्रगुप्तप्रकृतीनांहिचाणक्यदोषाएवापराग
हेतवः।तस्मिंश्चनिराकृतेप्रथममपिचंद्रगुप्तानुरक्ताःप्रकृतयइदानींपुनःसुतरामेवतत्रा
नुरागंदर्शयिष्यंति।राक्ष०।कुमारनैतदेवं।ताःखलुद्विःप्रकाराः।चंद्रगुप्तसहोत्थायिन्योनंद ४७
कुलानुरक्ताश्च।नचचंद्रगुप्तसहोत्थायिनीनांचाणक्यदोषाविरागहेतवोननंदकुलानुरक्ता
नां।तास्तुखलुनंदकुलमनेनपितृकुलभूतंघारस्तंघतघ्नेनघातितमित्यपरागामर्षाभ्यांवि

प्रकृताःसत्यःस्वाश्रयमलभमानाश्चंद्रगुप्तमेवानुवर्त्तंते।यादृशंपुनःप्रतिपक्षोद्धरणेसंभावि
तशक्तिमभियोक्तारमासाद्यक्षिप्रमेनंपरित्यज्यत्वामेवाश्रयंतइति।अत्रकुमारस्यवयमेवनि
दर्शनं।मलय०।अमात्यकिमेतदेवैकंसचिवव्यसनमभियोगकारणंचंद्रगुप्तस्याहोस्विदन्यद
प्यस्ति।राक्ष०।कुमारकिमन्यैस्तुबहुभिरपि।एतद्धितत्रप्रधानतमं।मलय०।अमात्यकथंप्रधा
नतमंनाम।किमिदानींचंद्रगुप्तःस्वराज्यधुरामन्यत्रमंत्रिण्यात्मनिवासमासज्यस्वयंप्रतिविधा
तुमसमर्थः।राक्ष०।बाढमसमर्थः।मल०।किंकारणमिति।राक्ष०।स्वायत्तसिद्धिषुउभयायत्तसि
द्धिषुवाभूमिपालेष्वेतत्संभवतिनचंद्रगुप्ते।चंद्रगुप्तस्तुदुरात्मानित्यंसचिवायत्तसिद्धावेवाव
स्थितश्चक्षुर्विकलइवाप्रत्यक्षसर्वलोकव्यवहारःकथमिवस्वयंप्रतिविधातुंसमर्थःस्यात्।

93

कुतः॥ नृपोपकृष्टः सचिवात्तदर्पणः स्तनंधयोत्यंतशिशुः स्तनादिव॥ अदृष्टलोकव्यवहारमूढ
धीर्मुहूर्त्तमप्युत्सहते न वर्त्तितुं॥ ७७॥ अत्युच्छ्रिते मंत्रिणि पार्थिवे च विष्टभ्य पादावुपतिष्ठते श्रीः।
सा स्त्रीस्वभावादसहा भरस्य तयोर्द्वयोरेकतरं जहाति॥ ७८॥ मलय०। आत्मगतं। दिष्ट्या न सचिवा
यत्ततंत्रोस्मि। प्रकाशं। अमात्य यद्यप्येवं तथापि बहुष्वभियोगकारणेषु सत्सु सचिवव्यस
निनमभियुंजानस्य शत्रुमभियोक्तुरैकांतिकी सिद्धिर्भवति। राक्ष०। ऐकांतिकीं सिद्धिमवगंतु
मर्हति कुमारः। कुतः॥ त्वय्युत्कृष्टबलेभियोक्तरि नृपे नंदानुरक्ते पुरे चाणक्ये चलिताधिकारवि
मुखे मौर्ये नवे राजनि॥ स्वाधीने मयि इत्यर्द्धोक्ते लज्जां नाटयन्। मार्गमात्रकथनव्यापारयो
ग्यायमेतल्लहाकांतरिता निसंप्रतिविप्सोत्तिष्ठंति साध्यानि नः॥ ७९॥ मलय०। यद्येवमभियोग

94

कालमुमात्यः पश्यति तत्किमास्यते पश्य॥ उत्तुंगास्तुंगकूलं स्रुतमदसलिलाः प्रस्यंदिसलिलं श्या
माः श्यामोपकंठद्रुममभिमुखराः कल्लोलमुखरं॥ स्रोतःखातावसीदत्तटमुरुदशनैरुत्सादिततटाः
शोणं सिंदूरशोणा मम गजपतयो पास्यंति शतशः॥ १०॥ अपि च॥ गंभीरगर्जितरवाः स्वमदांबुमि
श्रमासारवर्षमिव सीकरमुद्गिरंत्यः॥ विंध्यं विकीर्णसलिला इव मेघमाला रोत्स्यंति वारणघटा नगरं
मदीयाः॥ ११॥ इति साटोपं परिक्रम्य भागुरायणेन सह निष्क्रांतो मलयकेतुः। राक्ष० कः कोत्र भोः। प्रवि
श्य पुरुषः। आणवेदु अमच्चो। राक्ष० प्रियंवदक ज्ञायतां सांवत्सरिकाणां द्वारि कस्तिष्ठति। पुरु० जं
अमच्चो आणवेदि इति निष्क्रम्य पुनः प्रविश्य च। अमच्च एसो क्खु संवत्सरिओ खवणओ। राक्ष० अ
निमित्तं सूचयित्वा। स्वगतं। कथं प्रथममेव क्षपणकदर्शनं। पुरु० जीवसिद्धी। राक्ष० अबीभत्स

95

दर्शनं कृत्वा प्रवेशय। पुरु०। जं अमच्चो आणवेदी ति निष्क्रांतः। ततः प्रविशति क्षपणकः २। सासण
मलिहंताणं पडिवज्जह मोहवाहिवेज्जाणं॥ जे पढममेत्तकडुअं पच्छावत्थं उवदिसंति॥ २॥ उपसृत्य।
सावगा धम्मसिद्धी होदु। राक्ष०। भदंत निरूप्यतां तावदस्माकं प्रस्थानदिवसः। क्षपणकः। नाट्येन चिं
तयित्वा। सावका णिरूविदे लग्गे। अज्जमज्झण्णादो णिवुत्तसमत्तकल्लणा सोहणा तिही संपुणचंदा
पुण्णमासी। तुम्हाणं उत्तलाए दिसाए दक्खिणदिसं पट्ठिदाणं दक्खिणदुवालिए णक्खत्ते। अवि अ॥
अत्थाहिमुहे सूले उदिदे संपुणमंडले चंदे॥ गमणे बुधस्स लग्गे उदिअ अत्थमिदम्मि केदुम्मि॥ ३॥ राक्ष०। ४८
भदंत तिथिरेव न शुध्यति। क्षप०। सावकाए एक्कगुणा तिही चउग्गुणे णक्खत्ते चउसट्ठिगुणे लग्गे एसो
अ जोदिसतंतसिद्धंतो॥ लग्गे होइ सुलग्गे सोमम्मि गहे जहिज्ज दुल्लग्गे। पाविहिसि सव्वसिद्धिं चंदस्स

96



बलेण गच्छंतो ॥ ॥ राक्ष० भदंत अपरैः सांवत्सरिकैः सार्द्धं संवाद्यतां । क्षप० संवादेदु सावके हगे उण
गमिस्सं । राक्ष० न खलु कुपितो भदंतः । क्षप० कुविदे तु क्खाणण भदंते । राक्ष० कस्तर्हि । क्षप० स्वग
तं । भअवं तेकदंते । प्रकाशं । सावआ असमंजसो एसो जं अत्तणो पक्खं समुज्झिअ पलपक्खं पमाणी
कलेसि । इति निष्क्रांतः । राक्ष० प्रियंवदक ज्ञायतां का वेला वर्त्तत इति । पुरुषः जं अमच्चो आणवेदि
इति निष्क्रम्य पुनः प्रविश्य च । भे अज्ज अत्थाहिलासी भअवं सूरो । राक्ष० आसनादुत्थाय विलोक्य
च । अये ऽस्ताभिलाषी भगवान् भास्करः । तथा हि ॥ आविर्भूतानुरागाः क्षणमुदयगिरेरुज्जिहानस्य
भानोः पत्रच्छायैः पुरस्तादुपवनतरवो दूरमाश्वेव गत्वा ॥ एते तस्मिन्निवृत्ताः पुनरपरककुप्प्रांतपर्य
स्तबिंबे प्रायो भृत्यास्त्यजंति प्रचलितविभवं स्वामिनं सेवमानाः ॥ ५ ॥ ॥ छ ॥ इति निष्क्रांताः सर्वे च

97

तुर्थोंकः॥ ॥छ॥ ततः प्रविशति लेखमलंकरणस्थगिकां च मुद्रितामादाय सिद्धार्थकः २ ही माणहे।
बुद्धिजलणिज्झरेहिं सिंचंती देसकालघडएहिं॥ दंसिस्सइ कज्जफलं गरुअं चाणक्कणीदिलदा॥ई॥ ग
हिदो मए अज्जचाणक्केण पढमलिहिदो अमच्चरक्खसमुद्दालंकिदो अ अंलेहो। तस्स ज्जेव मुद्दालंछि
दा इअं अ आभरणप्पसेविआ। चलिदो म्हि किल पाडलिउत्तं ता जाव गच्छामि। परिक्रम्यावलोक्य च। क
हं खवणओ आअच्छदि ता जाव से असउणभूदं इमं दंसणं अदत्तदंसणो पडिहरामि। ततः प्रविशति
क्षपणकः २ अलिहंताणं पणमिमो जे दे गंभीलदाइ बुद्धीए॥ लोउत्तलेहिं लोए सिद्धिं मग्गेहिं मग्गं
ति॥७॥ सिद्धा॰ भदंते वंदेमि। क्षप॰ सावआ धम्मसिद्धी होदु। निर्वर्ण्य। सावआ जहाणसमुद्दतलणे
कं अज्झवसाअं पेक्खामि। सिद्धा॰ कहं भदंतो जाणादि। क्षप॰ सावआ किं एत्थ जाणिदव्वं एसे दे मग्ग

५०

९४



देसणोकणधारेकेसणिवेसिदेलेहेसूच्चेदि। सिद्धा०। आंजाणिदंभदंतेणदेसंतलम्हिपत्थिदोत्ति। ताकहे
दुभदंतोकीदिसोअज्जदिअहोत्ति। क्षप०। विहस्य। सावआमुंडा। विदमुंडोणक्खत्ताणिपुछसि। सिद्धा०।
भदंतसंपदंकिंजादंताकहेहिजइअद्धाणस्सअणुउलंभविस्सदितागमिस्संअणधाणिवत्तिस्सं। क्ष
प०। सावआगसंपदंएदस्सिंमलअकेदुकडएअणुउलेअणणुउलेवागच्छीअदि। सिद्धा०। भदंतकिं
क्खुदाणीं। क्षप०। सावआणिसामेहिपढमंदावएत्थमलअकेदुकडएलोअस्सआणिवालिदाणिग्गम
प्पवेसाआसि। दाणिंउणइदोपच्चासणेकुसुमउलेणकोविअमुद्दालंछिदोणिक्कमिदुंपविसिदुंवाअणु
भोदि। ताजइभागुराअणस्समुद्दालंछिदोसितदोगच्छवीसद्धंअणधाणिवत्तिअणिहुअंचिट्ठ। मागु
म्मट्ठाणाहिकिदेहिंसंजमिदकलचलणोलाउलंपवेसीअसि। सिद्धा०। किंणजाणादिभदंतोजधाअ

मच्चलक्खसस्स केरअं सिद्धत्थअं कवुलगे। ता अमुद्दालंछिदं विसंकस्स सत्ती वारेदुं। क्षप०। सावआ
लक्खसस्स पिसाअस्स वा केरअं होदिण स्थिऊण अमुद्दालंछिदस्स णिक्कमणो वाअं। सिद्धा०। भद्द
ततेण। हिमे कज्जसिद्धी होदु। क्षप०। सावआ गच्छ होदु दे कज्जसिद्धी। हगे वि भागुलाअणादो मुद्दं जाचे
मि। इति निष्क्रांतौ प्रवेशकः। ततः प्रविशति पुरुषेणानुगम्यमानो भागुरायणः।२। भद्र भासुरक न मां
दूरीभवंतमिच्छति कुमार मलयकेतुः। अतोस्मिन्नेवास्थानमंडपे न्यस्यतामासनं। पुरुषः। इदमासणं
उवविसदु अज्जो। भागु०। उपविश्यात्मगतं। अहो वैचित्र्यमार्यचाणक्यनीतेः। कुतः।। मुहुर्लक्ष्योद्भेदा मु
हुरधिगमाभावगहना मुहुः संपूर्णांगी मुहुरतिकृशा कार्यवशतः।। मुहुर्नश्यद्बीजा मुहुरपि बहु प्रापि ५१
तफलेत्यहो चित्राकारा नियतिरिव नीतिर्नयविदः।।८।। प्रकाशं। भद्र भासुरक यः कश्चिद्द्वारि मुद्रार्थी

मांद्रष्टुमिछतिसत्वयाप्रवेशयितव्यः।पुरुषः।जं अज्जो आणवेदि इतिनिष्क्रांतः।भागु०।स्वगतं।कष्ट
मेवमपिनाम।अस्मासुस्नेहवान्कुमारोमलयकेतुरस्माभिरभिसंधातव्यः।अहोदुष्करं॥कुलेलज्जा
यांच स्वयशसिचमानेचविमुखः शरीरंविक्रीयक्षणिकधनलोभाद्धनवति॥तदाज्ञांकुर्वाणोहितम
हितमित्येतदधुनाविचारातिक्रांतःकिमितिपरतंत्रोविमृशति॥५॥ततःप्रविशतिप्रती×अथवा।×हार्य
नुगतोमलयकेतुः।२।स्वगतं।अहोराक्षसंप्रतिमेवितर्कबाहुल्यादाकुलाबुद्धिर्ननिश्चयमधिगच्छति।
कुतः॥भक्त्यानंदकुलानुरागदृढयानंदान्वयालंबिनाकिंचाणक्यनिराकृतेनकृतिनामौर्येणसंधास्य
ति॥स्थैर्यंभक्तिगुणस्यवाविगणयन्किंसत्यसंधोभवेदित्यारूढकुलालचक्रमिवमेचेतश्चिरंभ्राम्य
कुमार ति॥१०॥प्रकाशं॥विजयेक्वभागुरायणः।प्रती०।एसोक्खुकडआदोणिक्कमिदुकामाणंमुद्दासंपाअण

K K S U LIBRARY
RAMTEK
441 106
Dist Nagpur

मणुचिट्ठदि। मलय०। विजयेमुहूर्त्तनिभृतपदसंचाराभव। यावदस्यपराङ्मुखस्यैवपाणिभ्यांनयने
निरुणद्धि। प्रती०। जंकुमारोआणवेदि इतितथैवास्ते। प्रविश्यपुरुषः। अज्जएसोक्खुखवणओमु
द्दाणिमित्तंअज्जंपेक्खिदुमिच्छदि। भागु०। प्रवेशय। पुरु०। जंअज्जोआणवेदि इतिनिष्क्रांतः। प्रविश्य
क्षपणकः। सावआधम्मविद्धीहोदु। भागु०। नाद्धेनावलोक्यस्वगतं। अयेराक्षसस्यमित्रंजीवसि
द्धिः। प्रकाशं। भदंतनखलुराक्षसस्यप्रयोजनंकिंचिदुद्दिश्यगम्यते। क्षप०। कर्णौपिधाय। संतंपावंर।
सावआतहिंगमिस्संजहिंलक्खसस्सणामंविणसुणीअदि। भागु०। भदंतबलीयांस्तेसुहृदिप्रण
यकोपस्तत्किमपराद्धंराक्षसेनभदंतस्य। क्षप०। सावआणममकिंविलक्खसेणअवलद्धंसअंजे
व्वगेमंदभग्गेअप्पाणअस्सअवलस्सामि। भागु०। भदंतवर्द्धयसिमेकौतूहलं। मलय०। स्व

५२

102



गतं।ममच।भागु०।श्रोतुमिच्छामि।मलय०।स्वगतं।अहमपि।क्षप०।सावआ।किंएदिणावोअसुणिद
व्वेणसुणिदेण।भागु०।भदंतयदिरहस्यंतत्तिष्ठतु।क्षप०।सावआणक्खुरहस्संकिंदुअदिणिसंसं।भागु०।
यदिनरहस्यंतत्कथ्यतां।क्षप०।सावआतहविणकधइस्सं।भागु०।भदंतअहमपिमुद्रांनदास्यामि।क्षप०।
स्वगतं।युक्तमिदानीमर्थिनेकथयितुं।प्रकाशं।कागदी।णिसामेदुसावआ।अत्थिदावअहगेमंदभग्गोपढमं
पाडलिउत्तेणिवसमाणेलक्खसेणसहमित्तत्तणमुवगदे।तहिंचअंतलेलक्खसेणगूढंविसकणापओ
अंसमुप्पादिअघादिदेदेवेपव्वदीसले।मलय०।सबाष्पमात्मगतं।कथंराक्षसेनघातितस्तातोनचाण
क्येन।भागु०।ततस्ततः।क्षप०।तदोहगेलक्खसस्समित्तमितिचाणक्कहदएणसणिआलंणअलादोणि
व्वसिदो।दाणिंविलक्खसेणणिअकज्जकुसलेणकिंपितादिसंजेव्वआलभ्भीअदिजेणहगेजीवलोआ
दोणिव्वासिआमि।भागु०।भदंतप्रतिश्रुतराज्यार्द्धसंप्रदानमनिच्छताचाणक्यहतकेनेदमकार्यमनु

ष्ठितंनराक्षसेनेतिश्रुतमस्माभिः। क्षप०। कर्णौपिधाय। संतंपावं२ सावआचाणक्को विसकणाएणामंपि
णजाणादि। भागु०। भदंतइयंमुद्दाएहिकुमारंश्रावय। मलय०। श्रुतंसखेश्रवणविदारणंवचःसु
हृन्मुखाद्रिपुमधिकृत्यभाषितं॥ पितुर्वधव्यसनमिदंहियेनमेचिरादपिद्विगुणमिवाद्यवर्द्धते॥११॥
क्षप०। स्वगतं। अयेश्रुतंमलयकेतुहतकेन। हंतकृतार्थःकौटिल्यइतिनिष्क्रांतः॥ मलय०। प्रत्यक्षवदा
काशेलक्षंबध्वा॥ राक्षस२ युक्तमिदं॥ मित्रंममेदमितिनिर्वृतचित्तवृत्तिंविश्रंभतस्त्वयिनिवेशितसर्व
कार्यं॥ तातंनिपात्यसहबंधुजनाक्षितोयैरन्वर्थतोपिननुराक्षसराक्षसोसि॥१२॥ भागु०। स्वगतं। र
क्षणीयाराक्षसस्यप्राणाइत्यार्यादेशः। भवत्वेवंतावत्। प्रकाशं। कुमारालमावेगेन। आसनस्थं ५३
कुमारंकिंचिद्विज्ञापयितुमिच्छामि। मलय०। उपविश्य। सखेकिमसिवक्तुकामः। भागु०। कुमा

र इहखल्वर्थशास्त्रव्यवहारिणामर्थवशादरिमित्रोदासीनव्यवस्थानलौकिकानामिवस्वेच्छाव
शात्।यतस्तस्मिन्काले सर्वार्थसिद्धिंराजानमिच्छतोराक्षसस्य चंद्रगुप्तादपिबलीयान्सुगृहीतना
मा देवः पर्वतेश्वर एवार्थपरिपंथीमहानरातिरासीत्।तस्मिंश्चराक्षसेनेदमनुष्ठितमितिनिर्दोषमि
वात्रपश्यामि।पश्यतु हि कुमारः।मित्राणिशत्रुत्वमुपानयंतीमित्रत्वमर्थवशाच्चशत्रून्॥नी
तिर्नयत्यस्मृतपूर्ववृत्ताजन्मांतरंजीवत एव पुंसः॥१२॥तदत्र वस्तुन्यनुपालभ्योराक्षसः आनंदरा
ज्यलाभादनुग्राह्यश्च।परतस्तस्यपरिग्रहेपरित्यागेवाकुमारःप्रमाणंभविष्यति।मलय०।सखे
सम्यक् दृष्टवानसि।अन्यथास्यवधेप्रतिबंधेचप्रकृतिक्षोभः स्यात्।एवंचसंदिग्धोविजयः स्या
दस्माकं।प्रविश्यपुरुषः।जेदु २ कुमारो।अज्जस्सगुम्मट्ठाणाधिकिदोदीहचक्खूअज्जंविण

वेदि। एसो कखु अम्हेहिं कडआदो णिक्कमंतो अगहिदमुद्दो सलेहो पुरिसो गहिदो ता पच्चक्खीकरेदु
णं अज्जो त्ति। भागु०। भद्द प्रवेशय। पुरुषः। जं अज्जो आणवेदी त्ति निष्क्रांतः। ततः प्रविशति पुरुषेणा
नुगम्यमानः सिद्धार्थकः। स्वगतं। आणंती इगुणे सुंदो से सुपरम्मुहं कुणंतीए॥ अम्हारिसजण
णीए पणमामो सामिभत्तीए॥१३॥ पुरुषः। अज्ज अअं से पुरिसो। भागु०। नाद्धेनावलोक्य। भद्द कि
मयमागंतुक आहोस्विदिहैव कस्यचित्परिग्रहः। सिद्धा०। अज्ज अहं कखु अमच्चरक्खसस्स केरओ।
भागु०। भद्र तत्किमगृहीतमुद्रः कटकान्निष्क्रामसि। सिद्धा०। अज्ज कज्जगौरवेण त्तुवरिदो। भागु०। ५४
भद्र तत्कीदृशं कार्यगौरवं यद्राजशासनमुल्लंघयति। मलय०। भागुरायण लेखमुपनय। भागु०।
सिद्धार्थकहस्ताल्लेखं गृहीत्वा मुद्रां दृष्ट्वा। कुमार अयं लेखः राक्षसनामांकितयं मुद्रा। मलय०। भागु

रायणमुद्रांपरिपालयन्नुद्वेष्ट्यदर्शय।भागु॰तथाकृत्वादर्शयति।मलय॰गृहीत्वावाचयति।स्व
स्तियथास्थाने।कोपिकमपिपुरुषविशेषमवगमयति।अस्मत्प्रतिपक्षंनिराकृत्यदर्शितासत्यवता
सत्यवादिता।सांप्रतमेतेषामपिप्रथममुपन्यस्तसंधीनामस्मत्सुहृदांपूर्वप्रतिज्ञातसंधिपरिपणप्र
तिपादनेनसत्यसंधःप्रीतिमुत्पादयितुमर्हति।एतेप्येवमनुगृहीताःसंतःस्वाश्रयविनाशेनैवोपकारि
णमाराधयिष्यंति।अविस्मृतमप्येतत्सत्यवतःस्मारयामि।एतेषांमध्येकेचिदरेःकोषदंडाभ्यामर्थिनः
केचिद्विषयेणेति।अलंकारत्रयंचसत्यवतायत्प्रेषितंतदुपगतं।मयापिलेखस्याशून्यार्थंकिंचिदनुप्रे
षितंतदुपगमनीयं।वाचिकंचाप्ततमात्सिद्धार्थकाच्छ्रोतव्यमिति।मलय॰सखेभागुरायणकीदृशोले
खार्थः।भागु॰भद्रसिद्धार्थककस्यायंलेखः।सिद्धा॰अज्जणजाणामि।भागु॰धूर्तलेखोनीयतेन

चक्षायते कस्येति। सर्वं तावत्तिष्ठतु वा चिकंत्वत्तः केन श्रोतव्यं। सिद्धा० तुम्हेहिं। भागु० किमस्माभिः। सि
द्धा० तुम्हेहिं गहिदोण आणामि किं भणामित्ति। भागु० सक्रोधं। एवज्ञास्यसि। भद्र भासुरक बहिनीत्वा
ताड्यतामेष यावदनेन कथितं भवेत्। पुरु० जं अज्जो आणवेदीति सिद्धार्थकेन सह निष्क्रांतः। पुनः प्रवि
श्य। अज्ज एदस्स ताडीअमाणस्स मुद्दालंछिदा पसेविआणि वडिदा। भागु० विलोक्य। कुमार इयम
पि राक्षसमुद्रांकितैव। मलय० अयं लेखस्याशून्यार्थो भविष्यति। इमामपि मुद्रां परिपालयन्नुद्घा
टय दर्शय। भागु० तथा कृत्वा दर्शयति। मलय० विलोक्य। अये तदिदमाभरणं यन्मया स्वशरीरादवता
र्य राक्षसाय प्रेषितं। व्यक्तं चंद्रगुप्तस्य कृतेऽयं लेखः। भागु० कुमार एष निर्णीयते संशयः। भद्र भासु
रक पुनरपि ताड्यतां। पुरु० जं अज्जो आणवेदि इति निष्क्रांतः। पुनरपि प्रविश्य पुरुषः। एसो क्खु ताडी

५५

१०४

जमाणो विणवेदि कुमारस्स ज्जेव णिवेदेमि त्ति । मलय० प्रवेशय । पुरु० जं अज्जो आणवेदि त्ति निष्क्र
म्य सिद्धार्थकेन सह प्रविशति । सिद्धा० पादयोर्निपत्य । अप्प एण कुमालो पसादं कलेदु । मलय० अप्पय
मेव परायत्तजनस्य तन्निवेद्यतां यथावस्थितं । सिद्धा० णिसामेदु कुमालो । अहं क्खु अमच्चरक्खसेण इ
मं लेहं दइअ चंदउत्तस्स सआसं पेसिदो । मलय० भद्र वाचिकमिदानीं श्रोतुमिच्छामि । सिद्धा० कुमाल
संदिट्ठो म्हि अमच्चेण । जधा एदे मम पिअवअस्सा पंच राआणो तुए समुप्पण्णसंधाणा । तं जहा । कुलूदा
हिवो चित्तवम्मा मलआहिवो सिंहणादो कस्मीरदेसणाहो पुक्खरक्खो सिंधुराओ सिंधुसेणो पारसीआ
धिवदी मेहणादो त्ति । एत्थ जे पढमभणिदा तिणि राआणो ते मलअकेदुणो विसअं अभिछंति । इदरे विदुव
कोसहत्थिबलं त्ति । तं जहा चाणक्कं णिराकरिअ महाभाएण मम पीदी उप्पादिदा तहा एदाणं पि पढमम

णिदो अह्मो संपादइदव्वोत्ति। एत्तिओ वाआसंदेसो। मलय०। स्वगतं। कथं चित्रवर्मादयोपि मामभिद्रु
ह्यंति। सत्यमत एवैषां तु राक्षसे निरतिशया प्रीतिः। प्रकाशं। विजये राक्षसं द्रष्टुमिच्छामि। प्रती०। जं कुमा
रो आणवेदि इति निष्क्रांतः। ततः प्रविशत्यासनस्थः स्वभवनगतः पुरुषेणानुगम्यमानः सचिंतो राक्ष
सः२। स्वगतं। संपूर्णमस्मद्बलं चंद्रगुप्तबलैरिति यत्सत्यं न मे मनसः शुद्धिरस्ति। कुतः॥ साध्ये निश्चित
मन्वयेन घटितं बिभ्रत्स्वपक्षे स्थितिं व्यावृत्तं च विपक्षतो भवति यत्तत्साधनं सिद्धये॥ यत्साध्यं स्वय
मेव तुल्यमुभयोः पक्षे विरुद्धं च यत्तस्यांगीकरणेन वादिन इव स्यात्स्वामिनो निग्रहः॥१७॥ अथवा ५६
तैस्तैर्विज्ञातापराधहेतुभिः प्राक्परिगृहीतोपजापैरापूर्णमिति न विकल्पयितुमर्हामि। प्रकाशं।
प्रियंवदक उच्यंतामस्मद्वचनात्कुमारानुयायिनो राजानः। संप्रति दिने दिने प्रत्यासीदति कुसुमपुरं

ततः कल्पितविभागैस्सर्वबलैः प्रयाणे प्रयतितव्यं। पुरु०। कथमिति। राक्ष०। प्रस्थातव्यं पुरस्तात्खशमग
धगणैर्मामनुव्यूह्य सैन्यैर्गांधारैर्मध्ययाने सयवनपतिभिः संविधेयः प्रयत्नः॥ पश्चात्तिष्ठंतु वीराः शक
नरपतयः संहृताश्चेदिहूणैः कौलूताद्यो विशिष्टः पथि परिवृणुयाद्राजलोकः कुमारं॥१५॥ पुरु०। जं अमच्चो।
आणवेदि इति निष्क्रांतः। ततः प्रविशति प्रतीहारी। जअदु २ अमच्चो। अमच्च इच्छदि कुमारो पेक्खिदुं। रा
क्ष०। भद्रे मुहूर्तं तिष्ठ। कः कोऽत्र भोः। प्रविश्य पुरुषः। आणवेदु अमच्चो। राक्ष०। भद्रोच्यतां शकटदासः य
था परिधापिता वयमाभरणं कुमारेण तन्न युक्तमिदानीमस्माभिरनलंकृतैः कुमारदर्शनमनुभवितुं।
अतो यत्तदलंकरणत्रयं क्रीतं तन्मध्यादेकं दीयतामिति। पुरु०। जं अमच्चो आणवेदि इति निष्क्रम्य पुनः
प्रविश्य च। अमच्च एदं तं अलंकरणं। राक्ष०। नाट्येनात्मानमलंकृत्योत्थाय च। भद्रे राजकुलगामिनं प

थानमावेदय।प्रती०।एदु २ अमच्चो।राक्ष०।स्वगतं।अधिकारपदं नाम निर्दोषस्यापि पुरुषस्य महदाशं
कास्थानं।कुतः।भयं तावत्सेव्यादभिनिविशते सेवकजनं ततः प्रत्यासन्नाद्भवति हृदयेष्वेव निहितं।।त
तोध्यारूढानां पदमसुजनद्वेषजननं मतिः सोच्छ्रायाणां पतनमनुकूलं कलयति।।१६।।परिक्रम्य प्रती०।
अमच्च अअं कुमालो चिट्ठदि उवसप्पदु णं अमच्चो।राक्ष०।नाट्येनावलोक्य।अये ऽयं कुमारस्तिष्ठति
य एषः।।पादाग्रे दृशामवधाय निश्चलंतीं शून्यत्वादपरिगृहीततद्विशेषां।।वक्त्रेंदुं वहति करेण दुर्वहाणां
कार्याणां कृतमिव गोरवेण नम्रं।।१७।।उपसृत्य विजयतां कुमारः।मलय०।अमात्य अभिवादये इद
मासनमास्यतां।राक्ष०।तथा करोति।मलय०।अमात्य चिरदर्शनेनार्यस्य वयमुद्विग्नाः।राक्ष०।कु
मारप्रयाणे प्रतिविधानमनुतिष्ठता मया कुमारादयमुपालंभोधिगतः।मलय०।आर्य प्रयाणे कथं

५७

112

प्रतिविहितमितिश्रोतुमिच्छामि।राक्ष०।कुमारएवमादिष्टाःकुमारस्यानुयायिनोराजानः।प्रस्थातव्य
मित्यादिश्लोकंपठति।मलय०।स्वगतं।विज्ञायते।कथंयएवमद्विनाशेनचंद्रगुप्तमाराधयितुमुद्यतास्त
एवमांपरिवृण्वंति।प्रकाशं।आर्यअस्तिकश्चिद्यःकुसुमपुरंप्रतिगच्छत्यागच्छतिवा।राक्ष०।कुमारा
वसितमिदानींगतागतप्रयोजनं।ननुपंचषैरहोभिर्वयमेवतत्रगंतारः।मलय०।स्वगतं।विज्ञायते।प्र
काशं।यद्येवंतत्किमयमार्येणसलेखःपुरुषःकुसुमपुरंप्रस्थापितः।राक्ष०।विलोक्य।अयेसिद्धार्थकः।
भद्रकिमिदं।सिद्धा०।सबाष्पंलज्जांनाटयति।पसीददु२अमच्चो।अमच्चताडिअंतेणमएणपारिदंअ
ज्जरहस्संधारिदुमित्यर्धोक्तेसभयमधोमुखस्तिष्ठति।मलय०।भागुरायणस्वामिनःपुरस्ताद्भीतो
लज्जितश्चनैवकथयिष्यति।अतःस्वयमेवार्यायकथय।भागु०।यदाज्ञापयतिकुमारः।अमात्यएवमे

113

पकथयतियथाहममात्यराक्षसेनलेखंदत्वावाचिकंचसंदिश्यचंद्रगुप्तसकाशंप्रस्थापितइति।रा
क्ष०।भद्रसिद्धार्थकअपिसत्यं।सिद्धा०।लज्जांनाटयति।इमंताडीअंतेणमएणिवेदिदं।राक्ष०।कुमारअ
नृतमेतत्।ताड्यमानःकिंनब्रूयात्।मलय०।भागुरायणदर्शयलेखं।वाचिकंचायमस्यैववक्तव्यःकथ
यिष्यति।भागु०।अमात्यायंलेखइतिलेखमुपनयति।राक्ष०।वाचयित्वाशत्रोःप्रयोगएषः।मलय०।
लेखस्यास्यशून्यार्थमार्येणेदमाभरणमनुप्रेषितंतत्कथंशत्रोःप्रयोगएषः।राक्ष०।आभरणंनिर्वर्ण्य।
कुमारनैतन्मयानुप्रेषितं।एतद्धिकुमारेणमह्यंदत्तंमयाचकस्मिंश्चित्परितोषस्थानेसिद्धार्थकायद
त्तं।भागु०।ईदृशस्याभरणविशेषस्यविशेषतःकुमारेणस्वगात्रादवतार्यदत्तस्यैवंपरित्यागभूमिः।
मलय०।वाचिकमप्यार्येणसिद्धार्थकाच्छ्रोतव्यमितिलिखितं।राक्ष०।कुमारकुतोवाचिकंकस्यवा।ले

५८

खएवास्मदीयोन भवति। मलय०। इयंतर्हि कस्यमुद्रा। राक्ष०। कपटमुद्रा। मल०। कपटमुद्रामप्युत्पाद
यितुं शक्नुवंति धूर्त्ताः। भागु०। कुमार सम्यगमात्योविज्ञापयति। भद्र सिद्धार्थक केनायं लिखितोले
खः। सिद्धा०। राक्षसस्यमुखमवलोक्य तूस्नीमधोमुखस्तिष्ठति। भागु०। भद्र अलं पुनरात्मानंता
डयित्वाकथय। सिद्धा०। अज्जसअडदासेण। राक्ष०। कुमारयदि शकटदासेन लिखितस्तदामयैवलि
खितः। मल०। विजये शकटदासं द्रष्टुमिच्छामि। प्रती०। जं कुमारो आणवेदि। भागु०। स्वगतं। न खल्व
निश्चितार्थमार्यचाणक्यप्रणिधयोभिधास्यंति तथाप्येवं तावत्। प्रकाशं। कुमार न कदाचिदपि श
कटदासोऽमात्यस्याग्रतो मया लिखित इति प्रतिपत्स्यते। अतौ लिखितमस्यानीयतां वर्णसंवाद एवै प्रति
नं प्रतिपादयिष्यति। मलय०। विजये एवं क्रियतां। प्रती०। कुमार मुद्दं पि जाचेअं। मलय०। उभयम

115

प्यानीयतां।प्रती०।जं कुमारो आणवेदीति निक्रम्य पुनः प्रविश्य च।कुमार इदं क्खु सअडदासेण स
हत्थलिहिदं पत्तअं मुद्दा अ।मलय०।उपनयमपि नाट्येनावलोक्य।अमात्य संवदंत्यक्षराणि।राक्ष०।स्व
गतं।संवदंत्यक्षराणि।शाकटदासस्तु मम मित्रमिति विसंवदंत्यक्षराणि।तत्किं हतेन शाकटदासेन।स्मृ
तं स्यात्पुत्रदाराणां विस्मृतस्वामिभक्तिना।।चलेप्यर्थेषु लुब्धेन न यशःस्वनपायिषु।।१५।।अथवा
कः संदेहः।।मुद्रा तस्य करांगुलिप्रणयिनी सिद्धार्थकस्तत्सुहृत्तस्यैवापरलेखसूचितमिदं लेखं प्र
योगाश्रयं।।सुव्यक्तं शाकटेन भेदपटुभिः संधाय सार्द्धं परैर्भर्तृस्नेहपराङ्मुखेन कृपणं प्राणार्थि ५७
ना चेष्टितं।।१६।।मलय०।अलंकारत्रयं श्रीमता यदनुप्रेषितं तदुपगतमिति यदार्येण लिखितं तन्म
ध्यादेकं किमिदं।निर्वर्ण्य स्वगतं।कथं तातेन धृतपूर्वमिदमाभरणं।प्रकाशं।आर्य कुतोयमलंका



रः। राक्ष०। वणिग्भ्यःक्रयादधिगतः। मलय०। विजयेऽपिप्रत्यभिजानासिभूषणमिदं। प्रती०। सबाष्पं।
कुमारकहंणपच्चहिजाणिस्सं। इदंक्खुसुगिहीदणामधेएणपव्वदीसरेणधारिदपुव्वं। म× निर्वर्ण्य×
ल०। सबाष्पं। हातात।। एतानितानितववल्लभभूषणस्यगात्रोचितानिकुलभूषणभूषणानि।। यैः
शोभितोसिमुखचंद्रकृतावभासोनक्षत्रवानिवशरत्समयप्रदोषः।।२०।। राक्ष०। स्वगतं। कथंपर्वते
श्वरेणधृतपूर्वाणीत्याह। प्रकाशं। व्यक्तमेतान्यपितेनचाणक्यप्रयुक्तेनवणिग्जनेनास्मासुविक्रीता
नि। मलय०। आर्यतातेनधृतपूर्वाणामाभरणानांविशेषतश्चंद्रगुप्तहस्तगतानांवणिग्भ्यःक्रयादधि
गमइतिनयुज्यते। अथवायुज्यते। कुतः। चंद्रगुप्तस्यविक्रेतुरधिकंलाभमिच्छतः।। कल्पितामूल्यमेते
षांक्रूरेणभवतावयं।।२१।। राक्ष०। स्वगतं। अहोसुश्लिष्टोभूषणप्रयोगः। कुतः।। लेखोयंनममेतिनोत्त

रमिदं मुद्रामदीयायतः सौहार्दं शकटेन खंडितमिति श्रद्धेयमेतत्कथं॥ मौर्ये भूषणविक्रयं नरपतौ को
नाम संभावयेत्तस्मात्संप्रतिपत्तिरेव हि वरं न ग्राम्यमत्रोत्तरं॥२२॥ मलय॰ एतदार्यं पृच्छामि। राक्ष॰ य
आर्यस्तं पृच्छ वयमिदानीमनार्याः संवृत्ताः। मलय॰ मौर्योसौ स्वामिपुत्रः परिचरणपरो मित्रपुत्रस्त
वाहं दाता सोर्थस्य तुभ्यं स्वमतमनुगतस्त्वं तु मह्यं ददासि। दास्यं सत्कारपूर्वं ननु सचिवपदं तत्र ते स्वा
म्यमत्र स्वार्थे कस्मिन्समीहा पुनरधिकतरे त्वामनार्यीकरोति॥२३॥ राक्ष॰ कुमार एवमतियुक्तव्याहा
रिणा कुमारेणैव मम निर्णयो दत्तः। कुतः। मौर्योसौ स्वामिपुत्र इत्यादि पठित्वा मामनार्यीकरोतीति पठ ६०
ति॥ मलय॰ लेखमलंकरणस्थगिकां च निर्दिश्य। इदमिदानीं किं। राक्ष॰ विधेर्विलसितमिदं न चा सबाष्पं।
णक्यस्य। कुतः॥ भृत्यत्वे परिभावधाम्नि सति स्नेहात्प्रभूणां सतां पुत्रेभ्यः कृतवेदिनां कृतधियां

येषांनभिन्नावयं॥तेलोकस्यपरीक्षकाःक्षितिभुजःपापेनयेनक्षतास्तस्येदंसकलंविधेर्विलसि
तंपुंसांप्रयत्नछिदः॥२४॥मलय॰सक्रोधं।कथमद्यापिनिह्नूयतएवविधेर्विलसितमिदंनसाचिव्यलो
भस्य।अनार्य॥कन्यांतीव्रविषप्रयोगविषमांकृत्वाकृतघ्नात्मनाविश्रंभप्रवणस्तदाममपितानीतः
कथाशेषतां॥संप्रत्याहितगौरवेणभवतामंत्राधिकारेरिपोःप्रारब्धाःप्रणयेनमांसवदहोविक्रेतुमे
तेवयं॥२५॥राक्ष॰स्वगतं।अयमपरोगंडस्योपरिविस्फोटः।प्रकाशं।कर्णौपिधाय।शांतंपापं।अ
पापोहंपर्वतेश्वरे।मलय॰केनतर्हिव्यापादितस्तातः।राक्ष॰दैवमत्रप्रष्टव्यं।मलय॰सक्रोधं।दैवमत्र
प्रष्टव्यंनक्षपणकोजीवसिद्धिः।राक्ष॰स्वगतं।कथंजीवसिद्धिरपिचाणक्यप्रणिधिः।हंतहृदयमपि
मेरिपुभिर्व्याप्तं।मलय॰सक्रोधं।भासुरकाज्ञाप्यतां।शिखरसेनःसेनापतिः।यएतेराक्षसेनसहसु

हृत्वासुत्याद्यास्मछरीराभिद्रोहेणचंद्रगुप्तमाराधयितुकामाःपंचराजानः।तद्यथा।कौलूतश्चित्रवर्मा·
मलयाधिपःसिंहनादः।काश्मीरःपुष्कराक्षः।सिंधुराजःसिंधुसेनः।पारसीकाधिपोमेघाख्यइति।अ
त्रयएतेषांत्रयःप्रधानतमाःप्रथमाःमदीयांभूमिकामयंतेतेगंभीरश्वभ्रमुपनीयपांसुभिःपूर्यतां॥
इतरौतुद्वौहस्तिबलकामौहस्तिनैवघात्यतामिति।पुरु०।जंकुमारोआणवेदीतिनिष्क्रांतः।मलय०।
सक्रोधं।राक्षस२नाहंविश्रंभघातीराक्षसः।मलयकेतुःखल्वहं।तद्गच्छसमाश्रीयतांसर्वात्मनाचं
द्रगुप्तः॥विष्णुगुप्तंचमौर्यंचसममप्यागतौत्वया॥उन्मीलयितुमीशोहंत्रिवर्गमिवदुर्नयः॥२६॥भा
गु०।कुमारकृतंकालहरणेन।शीघ्रमेवकुसुमपुरोपरोधायप्रतिष्ठंतामस्मद्बलानि॥गौडीनांलोध्र
पालीपरिमलधवलान्धूम्रयंतःकपोलान्क्लिश्यंतःकृष्णिमानंभ्रमरकुलरुचःकुंचितस्यालक

६१

स्य॥पांसुव्यूहाबलानांतुरगखुरपुटक्षोदलब्धात्मलाभाःशत्रूणामुत्तमांगेगजमदसलिलच्छिन्न
मूलाःपतंतु॥२७॥इतिसपरिजनोनिष्क्रांतोमलयकेतुः।राक्षसः।सावेगं।हाधिक्कष्टं।तेपिहतास्तपस्वि
नश्चित्रवर्मादयः।तत्कथंसुहृन्नाशायराक्षसश्चेष्टतेनरिपुविनाशाय।तत्किमिदानींकरवाणिमंद
भाग्यः॥किंगच्छामितपोवनंनतपसाशाम्यत्सवैरंमनः।किंभर्तॄननुयामिजीवतिरिपौस्त्रीणामियं
योग्यता॥किंवाखड्गसखःपताम्यरिबलेनेदंनयुक्तंभवेच्चेतश्चंदनदासमोक्षरभसंरुंध्यात्कृतघ्नं
नचेत्॥२८॥ ॥इतिनिष्क्रांतःपंचमोंकः॥५॥ ॥ततःप्रविशत्यलंकृतःसहर्षःसिद्धार्थकः॥जं
अदिजलदणीलोकेसवोकेसिघादीजअदिसुअणदिट्ठीचंदमाचंदउत्तो॥जेणइजअणसज्जेजी
अकाउणएणपडिहदपडिवक्खाअज्जचाणक्कणीदी॥२९॥ताजायचिरस्सकालस्सपिअवअ

121

ल॰ स्संसमिद्धॅअंपेक्खामि।परिक्रम्यावलोक्यच।अअंमेसोपिअवअस्सोसमिद्धत्थओइदोज्जेव्वआअ
च्छदि।ताजावणंउवसप्पामि।ततःप्रविशतिसमिद्धार्थकः।२।संदावंतावणएसुजमहूसवेसुहावेंता॥
हिअअट्ठिआविविहवाविरहेमित्ताणदुम्मंति॥२०॥सुदंचमएजधामलअकेदुकडआदोपिअवअ
स्सोसिद्धत्थओआअदोत्ति।जावणंअण्णेसामि।परिकम्यावलोक्यच।एसोसिद्धत्थओ।उपसृत्य।सिद्ध
त्थअअविसुहंपिअवअस्सस्स।सिद्धा॰।विलोक्य।कधंपिअवअस्सोसमिद्धत्थओ।उपगम्य।सुहंव
अस्सस्स।उभावप्यन्योन्यमालिंगतः।समिद्धा॰।कुदोसुहंजेणतुमंचिरप्पवासपच्चागदोअज्जविमेगे
हंणगच्छसि।सिद्धा॰।पसीददु२पिअवअस्सो।दिट्ठमेत्तोज्जेव्वअज्जचाणक्केणआणत्तोम्हिजधासिद्ध ६२
त्थअगच्छसअलंएदंवुत्तंतंपिअंपिअदंसणस्सचंदसिरिणोणिवेदेहित्ति।तदोतस्सणिवेदिअ

एधमणुभूदपत्थिवपसादोअहंपिअवअस्संजेव्वपेक्खिदुंतुहगेहंपचलिदोम्हि।समि०।वअस्स
जदिमएसुणिदव्वंभवेतदोकहेहि।किंतुएतंपिअंपिअदंसणस्सचंदसिरिणोणिवेदिदंत्ति।सिद्धा०।
वअस्सतवापिकिंअसुणिदव्वंताणिसामेहि।अत्थिदावअज्जचाणक्कणीदिमोहिदमइणामलअ
केदुहदएणणिराकरिअरक्खसंहदाचित्तवम्मप्पमुहामहापहावापंचपत्थिवा।तदोअसमिक्खिदका
रीएसोदुराआरोत्तिउज्झिअमलअकेदुहदअंअभूमिकुसलदाएभअविलोलसेणिअपलिवाले
सुसकंसकंविसअमभिप्पत्थिदेसुसामंतेसुभद्दभडपुरिसदत्तहिंगुराअबलउत्तराअसेणभागु
राअणरोहिदक्खविजअवम्मप्पमुहेहिंगहीदोमलअकेदू।समि०।वअस्सभद्दभडप्पमुहाकिल
देवस्सचंदसिरिणोअवरत्तामलअकेदुंसमासिदत्तिलोएमंतीअदि।ताकिंणुएदंकुकइकिअणाड

अस्सविअज्जणंमुहेअमंणिव्वहणे।। सिद्धा०। वअस्स दिट्ठिगदी विअअ मुणिअवादी अज्जचाण
क्कणीदीतासुणुदावतदोपहूद सारसाहणसमेदेण इदोणिक्कमिअअज्जचाणक्केणपडिवणंसअल
राअलोअंअसेसमेच्छबलं। समि०। वअस्सकहिंतं। सिद्धा०। जहिंएदे॥ अदिसअगरुएणंदाणदप्पेण
दंतीसजलजलदणीलाउच्चमत्ताणदंति। कसपहरभएणंजाअकंपातुरंगागाहिदजअणसज्जासं
पदंतेतुरंगा।।२१।। समि०। वअस्स सव्वंदावचिट्ठदु। तधासव्वलोअपच्चक्खंउज्झिअआहिआरोचिरंचि
ट्ठिअअज्जचाणक्कोकिंपुणोवितंजेव्वमंतिपदमारूढो।। सिद्धा०। वअस्सअदिमुद्धोदाणींसितुमं। जो
अमच्चरक्खसेणविअणवगाहिदपुव्वंअज्जचाणक्कबुद्धिंअवगाहिदुमिच्छसि। समिद्धा०। वअस्स
अमच्चरक्खसोसंपदंकहिं। सिद्धा०। वअस्ससोक्खुतस्सिंपलअकोलाहलेवट्टमाणेमलअकेदु ६२

कउआदोणिक्कमिअउंदुरणामहेएणचरेणअणुसरीअमाणोइमंजेव्वकुसुमउरंआअदोत्तिअज्ज
चाणक्कस्सणिवेदिदंणिउणेण।समि०।णंदरज्जपच्चाणअणकिदव्ववसाओणिक्कमिअसपदंअकि
दत्थोपुणोविइमंजेव्वपाडलिउत्तंआअदो।सिद्धा०।वअस्सतक्केमिचंदणदासस्ससिणेहेणत्ति।समि०।
वअस्सअधचंदणदासस्समोक्खंपेक्खसि।सिद्धा०।कुदोसेअधणस्समोक्खो।सोक्खुसंपदंअज्ज
चाणक्कस्सआणत्तीएदुवेहिंपिअम्हेहिंवज्झट्ठाणंपवेसिअवावादिदव्वो।समि०।सक्रोधं।अज्जचा
णक्कस्सअणोघादअजणोणहिजेणअम्हेईदिसेसुपओअणेसुणिउंजदि।सिद्धा०।वअस्सको
जीअलोएणिवसिदुकामोअज्जचाणक्कस्सआणत्तिंपडिहलेदि।ताएहिचंडालवेसधारिणोभवि
अचंदणदासंवज्झट्ठाणंणेमो।इत्युभौनिष्क्रांतौप्रवेशकः॥ततःप्रविशतिरज्जुहस्तःपुरुषः२।

णिसंसेसु

मिह करवाणि स्थिरमपि प्रयत्नं नो येषां विफलयति दैवं द्विषदिव ॥ ३४ ॥ मया हि ॥ देवे गते दिवमतद्विध
मृत्युयोग्ये शैलेश्वरं तमधिकृत्य कृतः प्रयत्नः ॥ तस्मिन्हते तनयमस्य तथाप्यसिद्धिर्दैवं हि नंदकुलश
त्रुरसौ न विप्रः ॥ ३५ ॥ अहो विवेकशून्यता म्लेच्छस्य । कुतः ॥ यो नष्टानपि जीवनाशमधुना शुश्रूषते स्वा
मिनस्तेषां वैरिभिरक्षतः कथमसौ संधास्यते राक्षसः ॥ इत्थं तेन विवेकमूढमतिना म्लेच्छेन नालोचितं
दैवेनोपहतस्य बुद्धिरथवा सर्वं विपर्यस्यति ॥ ३६ ॥ तदिदानीमरातिहस्तगतोपि वधं गच्छेन्न राक्षसश्चं
द्रगुप्तेन सह संधिं कुर्यात् । अथ च मम काममसत्यसंध इति वरमयशो न शत्रुवंचनपरिभव इति । स
मंतादवलोक्य सास्रं । एतास्ता देवस्य चरणचंक्रमपरिचयपवित्रीकृततलाः कुसुमपुरोपकंठभूम
यः ॥ इह हि ॥ शार्ङ्गज्याकृष्टिमुक्तप्रशिथिलकविकप्रग्रहेणात्र देशे देवेनाकारि चित्रप्रजवितुर

126

गोबाणभीक्षश्लेषु॥ अस्यामुद्यानराजौस्थितमिहकथितंराजभिस्तैर्विनेत्थंसंप्रत्यालोक्यमानाः
कुसुमपुरभुवोभूयसादुःखयंति॥३॥ तत्कुत्रखलुगच्छामिमंदभाग्यः। विलोक्य। भवतुदृष्ट
मेतज्जीर्णोद्यानमत्रप्रविश्यकुतश्चिच्चंदनदासस्यवृत्तांतमुपलप्स्ये। परिक्रम्य। अहोअलक्षि
तोपनिपाताःपुरुषाणांसमविषमदशाविभागपरिणतयोभवंति। कुतः॥ पौरैरंगुलिभिर्नवेंदुव
दहंनिर्दिश्यमानःपुरायोराजेवशनैःपुराभिरगमंराज्ञांसहस्रैर्वृतः॥ भूयःसंप्रतिसोहमेवनग
रेतन्नैववंध्यश्रमोजीर्णोद्यानकमेषतस्करइवत्रासाद्विशामिद्रुतं॥४॥ अथवायेषांप्रसादादि
दमासीत्तएवनसंति। नाट्येनप्रविश्यावलोक्यच। अहोजीर्णोद्यानस्यारमणीयता। अत्रहि॥ विप
र्यस्तंसौधंकुलमिवमहारंभरचनंसरःशुष्कंसाधोर्हृदयमिवनाशेनसुहृदां॥ फलैर्हीनावृक्षा

६५

127



विगुणविधियोगाद्विवनयास्खलणेश्छुभ्राप्रमिर्मतिरिवकुनीतेरविदुषः॥३७॥अपिचात्र॥क्षतांगी
नांतीक्ष्णैःपरशुभिरुदग्रक्रमपहतांरुजाकूजंतीनामविरतकपो तोपरुदितैः॥स्वचनिर्मोकिछेदैः
परिचितपरिक्लेशाकृपयाश्वसंतःशाखानांव्रणमिवनिबध्नंतिफणिनः॥३८॥एतेचतपस्विनोदृ
क्षाः॥अंतःशरीरपरिशोषमुदीरयंतःकीटक्षतिंशुचमिवातिगुरुंवहंतः॥छायावियोगमलिना
व्यसनेनिमग्नावृक्षाःश्मशानमुपगंतुमिवप्रवृत्ताः॥३९॥तद्यावदस्मिन्विषमदशापरिणामस
दृशेतावद्भग्नशिलातलेमुहूर्त्तमुपविशामि॥उपविश्याकर्ण्यच॥अयेतत्किमयमाकस्मिकःशंख
पटहध्वनिमिश्रोनांदीनादःश्रूयते॥यएषः॥प्रमृद्नन्श्रोतॄणांश्रुतिपथमसौरंगुरुतयाबहुत्वात्सा
सादैःसपदिपरिपीतोज्झितइव॥असौनांदीनादःपटुपटहशंखध्वनिमहान्दिशांदैर्घ्यंद्रष्टुं

128

प्रसरतिसकौतूहलइव॥४२॥विचिंत्य।आंभवतुज्ञातं।एषहिमलयकेतुसंयमनकृतंराजकुलस्ये
त्यर्द्धोक्तेमौर्यकुलस्याधिकंपरितोषंपिशुनयति।सबाष्पं।कष्टंभोःकष्टं।श्रावितोस्मिश्रियंवाचोर
भिनीयच्चदर्शितः॥अनुभावयितुंमन्येयलःसंप्रतिमांविधेः॥४३॥पुरुषः।आसीणोजावअअंता
वअज्जचाणक्काणत्तिंसंपादेमि।राक्षसमपश्यन्निवतस्याग्रतोरज्जुपाशेनात्मानमुद्बध्नाति।रा
क्ष०।विलोक्य।अयेकथमात्मानमुद्बध्नाति।नूनमहमिवदुःखितस्तपस्वी।भवतुपृच्छाम्येनं।उ
पसृत्य।भद्र२किमिदमनुष्ठीयते।पुरुषः।सबाष्पं।अज्जजपिअअणविणासदुक्खिदोअम्हा
रिसोमंदभग्गोअणुचिट्ठदि।राक्ष०।स्वगतं।प्रथममेवमयाज्ञातंनूनमहमिवार्तस्तपस्वी।भवतु
पृच्छाम्येनं।प्रकाशं।भद्रव्यसनसब्रह्मचारिन्यदिनगुह्यंनातिभारिकंवाततःश्रोतुमिच्छामि॥

पुरु॰। अज्जणरहस्संणवाअदिगरुअं। किंदुणसक्कुणोमिपिअविणासदुक्खिदोएत्तिअमेत्तंपिम
रणकालहरणंकादुं। राक्ष॰। निश्वस्यात्मगतं। कष्टमेतेसुहृद्व्यसनेषुपरवदुदासीनाः प्रत्यादिश्या
महे वयमनेन। प्रकाशं। भद्रयदिनरहस्यंनातिगुरुवातत्पुनः श्रोतुमिच्छामि। पुरु॰। अहोणिबंधोअ
स्सएसोणिवेदेमि। अत्थिएत्थणअरेसेट्ठीजिण्हुदासोणाम। राक्ष॰। स्वगतं। अस्तिजिष्णुदासश्चंदन
दासस्यमित्रं। भवतुप्रकाशं। बाढमस्तिकिंतस्य। पुरु॰। सोमेपिअवअस्सो। राक्ष॰। सहर्षमात्मगतं।
अयेप्रियवयस्यइत्याह। हंतात्यंतंसन्निकृष्टःसंबंधः। ज्ञास्यतिचंदनदासस्यवृत्तांतं। पुरु॰। सोसं
पदंदिआदिजणदिणविहवोजलणंपविसिदुकामोणअरादोणिक्कमदि। ताअहंविजावतस्स
असुणिदव्वंणसुणोमितावअत्ताणंउब्बंधिअवावादेमित्तिइमंजिण्णुज्जाणमागदो। राक्ष॰। अ

130

ग्निप्रवेशेशौतवसुहृदःकोहेतुः।किमौषधपथातिगैरुपहतोप्सवेद्याधिभिः।पुरु॰।अज्जणहिणहि।
राक्ष॰।किमग्निविषकल्पयानरपतेर्निरस्तःक्रुधा।।पुरुषः।अज्जसंतंपावं२।जदोचंदउत्तस्सजणवदे
णिसंसापडिवत्ती।।राक्ष॰।अलभ्यमनुरक्तवान्कथयकिंनुनारीजनं।पुरुषः।कर्णौपिधाय।अज्ज
तंपावं२।अभूमिक्खुएसासेट्ठिजणस्स।विसेसतोजिण्हुदासस्स।राक्ष॰।किमस्यभवतोयथासुहृ
दएवनाशोविषं।।४।।पुरुषः।अज्जअधइं।राक्ष॰।सावेगमात्मगतं।चंदनदासोस्यसुहृद्विनाशहे
तुरिति।यत्सत्यमाकुलितएवास्मिसुहृत्स्नेहपक्षपातिनाहृदयेन।प्रकाशं।भद्रतस्यापितवसुहृदः
स्नेहलतयाश्रोतव्यचरितस्यसुचरितंश्रोतुमिच्छामि।पुरुषः।अदोअवरंणसक्कुणोमिमंदभग्गोमर
णस्सविग्घंउप्पादेदु।राक्ष॰।श्रवणीयांकथांकथयतुभद्रमुखः।पुरु॰।कागदीएसोक्खुणिवेदेमि



णिसामेदु अज्जो।राक्ष०।भद्र दत्तावधानोस्मि।पुरुषः।अत्थि एत्थ णअरे पुप्फपुरणिवासी मणिआर
सेठ्ठी चंदणदासो णाम।राक्ष०।सविषादमात्मगतं।एतत्तदुपाहृतमस्मच्छोकदीक्षाप्रवेशद्वारं दैवेन।
हृदय स्थिरीभव किमपि ते कष्टतरमाकर्णनीयमस्ति।प्रकाशं।भद्र श्रूयते मित्रवत्सलः स साधुः किं
तस्य।पुरु०।सो अ तस्स जिण्हुदासस्स पिअवअस्सो होदि।राक्ष०।स्वगतं।अयमभ्यर्णः शोकवज्रपा
तो हृदयस्य।पुरु०।तदो जिण्हुदासेण पिअवअस्सस्स सिणेहसरिसं अज्ज विणविदो चंदउत्तो।राक्षसः।
कथय किमिति।पुरु०।देव अत्थि मे गेहे कुडुंबभरणपज्जत्तो अत्थवत्तो।ता दिण विणिमएण विमुच्चदु मे
पिअवअस्सो चंदणदासोत्ति।राक्ष०।स्वगतं।साधु जिष्णुदास साधु दर्शितो निर्व्याजमित्रस्नेहः।कुतः।
पितॄन्पुत्रान्भ्रातॄन्परवदभिसंधाय पितरो यदर्थं सौहार्दं सुहृदि च समुज्झंति सुहृदः।।प्रियं संतं

132

त्यक्तुं व्यसनिनि निर्व्यपेक्षे व्यवसितः कृतार्थोयं सोर्थस्तत्र वसति वणिक्के सुवणिजः॥ ७५॥ प्रकाशं। भद्र न तस्तथाभिहिते न सता किं प्रतिपन्नं मौर्येण। पुरु०। अज्ज तदो एव्वं भणिदेण चंदउत्तेण पडिस्सणिदो जिण्हुदासो। जिण्हुदास ण मए अत्थस्स कारणेण सेट्ठी संजमिदो चंदणदासो। किं दु पच्छादिदो अणेण अमच्चरक्खसस्स घरअणो बहुसो जाचिअंतेण विण समप्पिदो। ता जइ तं समप्पेदि तदो अत्थि से मोक्खो। अण्णधा पाणहरो से दंडो अम्हकोवं पसामेदु त्ति। अण्णो वि जधा एव्वं ण करइस्सदि त्ति वज्झट्ठाणं आणत्तो। तदो जाव पिअवअस्सस्स चंदणदासस्स असुणिदव्वं ण सुणोमि ताव जेव्व जलणं पविसामि त्ति सेट्ठी जिण्हुदासो णअरादो णिक्कंतो। अहं पि जाव पिअवअस्सस्स जिण्हुदासस्स असुणिदव्वं ण सुणोमि ताव अत्ताणं वावादेमि त्ति इमं जिण्णुज्जाणमागदोम्हि। राक्ष०। न खलु व्यापादितश्चंदनदासः। सत्वरं।

६८

133

पुरु०।अज्जणतावववावादीअदि।सोक्खुसंपदंपुणोपुणोअमच्चरक्खसस्सघरअणंजाचीअदिण
एसोमित्तवच्छलदाएतंसमप्पेदि।ताएदिणाकालणेणहोदिसेमरणस्सकालहरणं।राक्ष०सहर्षमात्म
गतं।साधुवयस्यचंदनदाससाधु॥शिबेरिवसमुद्भूतंशरणागतरक्षणात्॥नचीयतेत्वयासाधोयशो
पिसुहृदाविना॥४६॥प्रकाशं।भद्रशीघ्रमिदानीं।जिष्णुदासंज्वलनप्रवेशान्निवारय।अहमपिचंदनदा
संमरणान्मोचयिष्यामि।पुरु०।अधकेणउवाएणअज्जोचंदणदासंमरणादोमोचेदि।राक्ष०खड्गमाकृ
ष्य।नन्वनेनव्यसनसहायसुहृदानिस्त्रिंशेन।पश्य।निस्त्रिंशोयंविगतजलदव्योमसंकाशमूर्त्तिर्युद्ध
श्रद्धापुलकितइवप्राप्तसख्यःकरेण॥सत्वोत्कर्षात्समरनिकषेदृष्टसारःपरैर्मेमित्रस्नेहाद्विवशम
धुनासाहसेमांनियुंक्ते॥४७॥पुरु०।एवंसेट्ठिचंदणदासजीविदब्भुववत्तिपिसुणिदाविसमदसाविभा

गपडिदोणसक्कुणोमिणिच्चिदपदंभणिदुंसुगिहीदणामहेआअमच्चरक्वसपादातुम्हेत्ति।ताकरेध
मेपसादंसंदेहंणिणएण।राक्ष०।भद्रसोहमनुभूतभर्तृवंशविनाशःसुहृद्विनाशहेतुरनार्यदुर्गृही
तनामायथार्थराक्षसः।पुरु०।सहर्षंपादयोर्निपत्य।हीमाणहेदिठिआकदत्थम्हि।राक्ष०।भद्रोत्तिष्ठोत्ति
ष्ठ।भद्रकृतमिदानींकालहरणेननिवेद्यतांजिष्णुदासाय।एषराक्षसश्चंदनदासंमरणान्मोचयतीति।नि
स्त्रिंशोयमित्यादिपठन्नाकृष्टखड्गःपरिक्रामति।पुरु०।पादयोर्निपत्य।पसीदंतु२अमच्चपादा।अत्थि
दावएदंपढमंचंदउत्तेणअज्जसअडदासोवावाइदुमाणत्तो।सोकेणविविस्सट्ठाणादोअवहरिअदेसं
तरंअववाहिदो।तदोचंदउत्तहदएणकीसपमादोकिदोत्ति।अज्जसअडदासवधवंचणाएसेसमुज्जलि ६७
दोरोसग्गीघादअजणवहेणविस्साविदो।तदोपहुदिघादआजंकंपिगहिदसत्थंजपुरुवंपुरिसंज

ग्गदोपच्चादोवापेक्खंतितदोअत्तणोजीविदंरक्खंताएदेवस्सट्ठाणेवस्सं वावादंति।ताएदंगहिदस
त्थेहिंअमच्चपादेहिंगच्छंतेहिंसेठ्ठिचंदणदासवहोहोदि।इतिनिष्क्रांतः।राक्षसः।अहोदुर्बोधश्चाणक्यव
टोनीतिमार्गः।कुतः।यदिसशकटोनीतःशात्रौमेमांतिकंकिमितिनिहतस्तेनक्रोधाद्वधाधिकृतोजनः॥
अथसकृतकंताहृग्लेखंकथंनुविभावयर्मतेन×येदितिममतिस्तेकारूढानपश्यतिनिश्चयं॥४४॥
विचिंत्य।नायंनिस्त्रिंशाकालः प्रथममिहकृतेघातकानांविघातेनीतिःकालांतरेणप्रकटयतिफलं
किंतयाकार्यमत्र॥औदासीन्यंनयुक्तंप्रियसुहृदिगतेमत्कृतामेवघोरांव्यापत्तिंज्ञातमस्यस्वतनुम
हमिमांनिष्क्रयंकल्पयामि॥४५॥ ॥इतिनिष्क्रांतः षष्ठोंकः॥ ॥छ॥ ॥ततः प्रविशतिचंडालः २।
ओसलधअज्जाओसलध।अवेहमाणवेअवेह॥वस्सेहहल्लाइदव्वंविसंवपलिहलहसघवस

णाइं॥एदेसुवड्ढमाणस्सहोदिकुलहोणविणिवादो॥५०॥अविअ॥ईजेमदूहलक्खिवड्ढुंसेपाणंविरु
वंकुलंकलत्तंअ॥तापलिहलधविसमिवलाआवत्तंसुदूलेण॥५१॥अविअ॥होदिपुलिसस्सवा
हीमलणंवासेविदेअवत्थम्मि॥लाआवत्थेउणसेविदम्मिसअलंकुलंमलदि॥५२॥ताजदिणपुत्ति
अधपेक्खवधएदंलाआवत्थकालिणंसेट्ठिचंदणदासंवज्झट्ठाणंणीअमाणं।आकाशे।अज्जाकिंभ
णाधअत्थिसेकोविमोक्खेवावाओत्ति।कुदोसेअधणस्समोक्खो।अत्थिजइअमच्चरक्खसस्सपरिअ
णंसमप्पेदि।पुनराकाशे॥किंभणाधएसेसलणागदवच्छलेअत्तणोजीवि[illegible]न्तस्सकालणेणणईदिसं
अकज्जंकलिस्सदित्ति।अज्जाजदिएव्वंतेणहिअवधालेधसेसुमगदिं।एत्तिकेदाणिंतुम्हाणंएत्थ
पडिआलविहवे।ततःप्रविशतिद्वितीयचंडालानुगतोवध्यवेषधारीशूलंस्कंधेनादायकुडंबिन्यो ७०

पुत्रेणचानुगम्यमानश्चंदनदासः।कुटुंबिनी।हद्धि २॥अम्हारिसाणविजणेणिच्चंचारित्तभंगभी
रूणं॥चोरजणोचिअमरणेपत्तंतिणमोकअंतस्स॥५३॥अधवाणिसंसाणंउधासीणेसुइदरे
सुवाविसेसोअत्थि।तधाहि॥मोत्तूणआमिसाइंमरणभएणंतणेहिंजीवंति॥वाहाणमुद्धहरिणेहं
तुंकोणामणिबंधो॥५४॥चंदन०।समंतादवलोक्य।भावपिअवअस्सजिण्हुदासकधंपडिवअणं
पिमेणपडिवज्जसि।अधवादुल्लहाक्खुतेमाणुस्साजेइमस्सिंकालेदिट्ठिवहेविचिट्ठंति।सबाष्पं।ए
देअहोपिअवअस्साअंसुवादमेत्तकेणकिदपडीआरासरीरेहिंविणिअत्तमाणापरिअंतिदसो
अदीणवअणावाहगरुआएदिट्ठीएमंजणुगच्छंति।चांडालः।परिक्रम्यावलोक्यच।अज्जचंद
णदासपरागदोसिवज्झट्ठाणंताविसज्जेहिघरअणंदाणिं।चंदन०।अज्जेकुडुंबिणिणिअत्तसुसं

पदंसपुत्ता अदोअवरं अप्पभूमी अणुगच्छिदुं। कुडुं०। सबाष्पं। परलोअं पत्थिदो अज्जो ण देसंतरं। ता
अत्ताणं दाणिं कुलजणस्स णिवत्तिदुं। चंदन०। अधोकिं ववसिदं अज्जाए। कुडुं०। भत्तुणो चलणे अ
णुगच्छंती एअ अज्जो अणुग्गाही होदु। चंदन०। दुव्ववसिदं एदं दे दाणिं अज्जाए। अअं पुत्तको अमुणि
असंववहारो अणुगेहिदव्वो। कुडुं०। अणुगेह्णतुणं पसण्णाओ भवदीओ कुलदेवदाओ। जादपुत्त
अपणमसु अवच्छिमं पिदुणो पाएसुं। पुत्रः। पादयोर्निपत्य। तादं मए दावतादरहिदेण किं अणुचि
ट्ठिदव्वं। चंदन०। पुत्त चाणक्करहिदे देसे वसिदव्वं। चंडालः। अज्ज चंदणदास णिक्खवादे सूले ता सज्जो
दाणिं होहि। कुडुं०। अज्जा परित्ताअध२। चंदन०। अइ जिअवच्छले किं एत्थ अक्कंदसि। सग्गंगदा
क्खु ते देवाणं दा जे दुक्खिदं जणमणुकंपंति। अण्णं च मित्तकज्जेण मे विणासो ण पुरिसदोसेण। ता

७१

739



किंएदंहरिसट्ठाणेविरोदीअदि।प्रथमश्चंडालः।जलेकिंद्वंसआणेण्हहिदाणिंसूलारोअणेचंदण
दासं।सञ्जंजेवघरअणोणिअत्तिस्सदि।द्वितीयश्चंडालः।अलेवज्ञलोमजाएसेगेह्लामि।चंदन०।
भद्दमुहचिठ्ठसुहुत्तंजावपुत्तअंआसासेमि।पुत्रंमूर्ध्निसमाघ्राय।जादपुत्तअअवस्संसविदव्वेवि
णासेमित्तकज्जंउव्वहमाणोविणासमणुभवामि।पुत्रः।तादएव्वंपिकिंभणिदव्वंकुलक्कमोक्खुएसो
अम्हाणं।इतिपादयोःपतति।चांडालः।गेण्हलेवज्जलोमआ।कुटुं०।अज्जापलित्ताअथ२।प्रवि
श्यपटाक्षेपेणराक्षसः।भवतिनभेतव्यं२भोभोःशूलपतेनखलुव्यापादनीयश्चंदनदासः।कु
तः॥येनस्वामिकुलंरिपोरिवकुलंदृष्टंविनश्यत्पुरामित्राणांव्यसनेमहोत्सवइवस्वस्थेनयेन
स्थितं॥आत्मायस्यचवंधनापरिभवक्षेत्रीकृतोपिप्रियस्तस्येयंममतृत्युलोकपदवीवध्यस्रगाव

ध्यतां॥५५॥चंदन०।विलोक्य।सबाष्पं।अज्ज किंएदं।राक्ष०।त्वदीयस्यसुचरितैकदेशस्यानुकरणं
किल।चंदन०।अमच्चसव्वंपिणिप्फलं।इमंअत्ताणअंपआसअंतेणणमेपिअमणुचिट्ठिदंअमच्चे
ण।राक्ष०।सखेचंदनदासस्वार्थप्रधानोजीवलोकः।कृतमुपालंभेन।भद्रमुखौनिवेद्यतांतावद्दुरा
त्मनेचाणक्यहतकाय।चंडालौ।अथकिंत्ति।राक्ष०।दुष्कालेपिकलावसज्जनरुचौप्राणैःपरंरक्षता
नीतंयेनयशस्विनाप्रलघुतामौशीनरीयंयशः॥बुद्धानामपिचेष्टितंसुचरितैःक्लिष्टंविशुद्धात्म
नापूजार्होपिसयत्कृतेतवगतोवध्यत्वमेषोस्मिसः॥५६॥प्रथमश्चंडालः।अलेविह्वंसआतुमंचंद
णदासंगेण्हिअएदस्समसाणपादवस्सछाआएमुहुत्तंचिट्ठजावअहंचाणक्कस्सणिवेदेमिज
धागहिदोअमच्चरक्खसोत्ति।द्वितीयः।अलेवज्जलोमआएवंहोदु।इतिसपुत्रदारेणचंदनदा

सेनसहनिष्क्रांतः प्रथमः।द्वितीयोराक्षसेनसहपरिक्रम्य।केकेएत्थदुआलिआणंणिवेदेहदावणं
दकुलसेलसंचअचूरणकुलिसाहं मौलिअकुलपडिष्ठावकाहंपउढधम्मसंचआहंअज्जचाणक्का
हा।राक्ष०।स्वगतं।कष्टमेतदपिनामराक्षसेनश्रोतव्यं।चांडालः।एसोक्खुअज्जणीदिणिअलसंज
मितबुद्धिपुलिसआलेअमच्चलक्खसेगहिदेत्ति।ततःप्रविशतिजवनिकावृतशरीरोमुखमात्रदृश्यः
सहर्षश्चाणक्यः।र आः।कथय२।केनोत्तुंगशिखाकलापजटिलोबद्धःपटांतेशिखीपाशैःकेनसदाग
तेरगतितासद्यःसमापादिता।।केनानेकपदानवासितसटःसिंहोर्पितःपंजरेभीमःकेनचनैकनक्रम
करोदोर्भ्यांप्रतीर्णोर्णवः।।५७।चांडालः।णंणीदिणिउणबुद्धिणाअज्जेणज्जेव।चाणक्यः।मा२मामैवं।
नंदकुलविद्वेषिणादैवेनेतिब्रूहि।राक्ष०।विलोक्यस्वगतं।अयेअयंसदुरात्मा।अथवाऽयंसमहात्मै

वकौटिल्यः॥आकरःसर्वशास्त्राणांरत्नानामिवसागरः॥गुणैर्नपरितुष्यामोयस्यमत्सरिणोवयं॥७८।
चाण०।विलोक्यसहर्षंस्वगतं।अयेऽयममात्यराक्षसः।येनमहात्मना॥गुरुभिःकल्पनाक्लेशैर्दीर्घ
जागरहेतुभिः॥चिरमायासितासेनावृषलस्यमतिश्चमे॥७९।जवनिकामपनीयोपसृत्यच।भोभो
अमात्यराक्षसविष्णुगुप्तोऽभिवादयते॥राक्ष०स्वगतं।अमात्यइतिलज्जाकरमिदानींविशेषणपदं।
प्रकाशं।भोभोविष्णुगुप्तनमांश्वपाकस्पर्शदूषितंस्प्रष्टुमर्हसि।चाण०।अमात्यराक्षसनायंश्वपाकः।
अयंखलुदृष्टएवभवतासिद्धार्थकनामाराजपुरुषः।योऽप्यसौद्वितीयःसोऽपिसमिद्धार्थकनामाराज
पुरुषएव।शकटदासोऽपितपस्वीतादृशंकपटलेखमजानन्नेवमयालेखितः।राक्ष०।सहर्षं।स्वगतं।
दिष्ट्याशकटदासंप्रत्यपनीतोमेविकल्पः।चाण०।किंबहुनाएषसंक्षेपतःकथयामि।भृत्याभद्रभ

७३

143



टादृयःसचतथालेखःससिद्धार्थकस्तथालेकरणत्रयंसभवतोमित्रंभदंतःकिल॥जीर्णोद्यानगतःस
चार्त्तपुरुषःक्लेशःसचश्रेष्ठिनःसर्वोसौममइत्यर्द्धोक्तेलज्जांनाटयति।सर्वोसौवृषलस्यवीरभवतांसं
योगमिच्छोर्नयः॥६०॥तदेषवृषलस्त्वांद्रष्टुमिच्छतिपश्यैनं।राक्ष०।स्वगतं।कागतिः।प्रकाशं।एषपश्या
मि।ततःप्रविशतिराजाविभवतश्चपरिवारः।राजा।स्वगतं।विनैवयुद्धादार्येणपराजितंदुर्जयंपरब
लमितिसत्यंलज्जितइवास्मि।ममहि॥फलयोगमवाप्यसायकानांविधियोगेनविलक्षतांगतानां॥
नशुचेवभवत्यधोमुखानांनिजतूणीशयनव्रतस्यनिष्ठा॥६१॥अथवा॥विगुणीकृतकार्मुकोपिजे
तुंभुविजेतव्यमसौसमर्थएव॥स्वपतोपिममेवयस्यतंत्रेगुरवोजाग्रतिकार्यजागरूकाः॥६२॥चाण
क्यमुपसृत्य।आर्यचंद्रगुप्तःप्रणमति।चाण०।संपन्नास्तेसर्वाआशिषस्तदिदानींतत्रभवंतममात्य

राक्षसमभिवादयस्व। पैतृकस्तवायममात्यमुख्यः। राक्ष०। स्वगतं। योऽजितोनेनसंबंधः। राजा। राक्षसं
समुपसृत्य। आर्यचंद्रगुप्तः प्रणमति। राक्ष०। विलोक्यस्वगतं। अयेऽयंचंद्रगुप्तः। यएषः। बालएवहि
लोकेनसंभावितमहोन्नतिः॥ क्रमेणारूढवान्राज्यंयूथैश्वर्यमिवद्विपः॥६३॥ प्रकाशं। राजन्विज
यस्व। राजा। आर्य। जगतः किंनविजितंमयेतिप्रविचिंत्यतां॥ गुरौषाड्गुण्यचिंतायामार्येत्वयिचजाग्र
ति॥६४॥ राक्ष०। स्वगतं। स्पृशतिमांकौटिल्यशिष्योभृत्यभावेन। अथवाविनयएवैषचंद्रगुप्तस्य
मत्सरस्तुमेविपरीतंकल्पयति। सर्वथास्थानेयशस्वीचाणक्यः। कुतः॥ द्रव्यंजिगीषुमधिगम्यजडात्म
नोपिजेतुर्यशस्विनिपदेनियतंप्रतिष्ठा॥ अद्रव्यमेत्यभुविचित्रनयोपिमंत्रीसोपाश्रयःपततिकूले
जवृक्षवत्या॥६५॥ चाण०। अमात्यराक्षसइष्यतेचंदनदासस्यजीवितं। राक्ष०। भोविष्णुगुप्तकुतः

७४

145

संदेहः।चाण०।अमात्यराक्षस अगृहीतशस्त्रेण भवता नानुगृह्यते वृषल इत्यतः संदेहः।यदि सत्यमे
व चंदनदासस्य जीवितमिष्यते ततो गृह्यतामिदं शस्त्रं।राक्ष०।चिंतयति।चाण०।तपोवनं यामि विहाय मौ
र्यैलां चाधिकारेष्वधिकृत्य मुख्यं॥ त्वयि स्थिते वाक्यनिबद्धबुद्धौ सुनकुगामिंद्र इवैष चंद्रः॥६६॥ इति
पुनस्तदेव पठति।राक्ष०।भो विष्णुगुप्त मा मैवं।अयोग्या वयमेतस्य विशेषतस्त्वयागृहीतस्य।चाण०।
अमात्यराक्षस योग्योहमयोग्य इति किमनेन।पश्य॥ अश्वैः सार्द्धमजस्रदत्तकविकाक्षामैरशून्यास
नैः स्नानाहारविहारपानशयनस्वेच्छासुखैर्वर्जितान्॥ माहात्म्यात्तव पौरुषस्य मतिमन्दृप्तारिदर्पच्छि
दः पश्यैतान्परिकल्पनाव्यतिकरप्रोढून्नवंशान्गजान्॥६७॥ अथवा किमनेन।न खलु भवतः शस्त्र
ग्रहणमंतरेण चंदनदासस्य जीवितमस्ति।राक्ष०।स्वगतं।नंदस्नेहकणाः स्पृशंति हृदयं भृत्योस्मि

ताद्विद्विषांयेसिक्ताःस्वयमेवपाणिपयसाछेद्यास्तएवद्रुमाः॥शास्त्रंमित्रशरीरकेषुसरूषाव्यापारणीयं
सदाकार्याणांगतयोविधेरपिनयंत्यालोचनागोचरं॥इत्य।प्रकाशं।भोविष्णुगुप्त नमःसर्वकार्यप्रतिपत्ति
हेतवेसुहृत्त्वेनहायकागतिरेषसज्जोस्मि।चाण०।सहर्षं।वृषल२अमात्यराक्षसेनेदानींगृहीताधिकारे
णानुगृहीतोदिष्ट्यावर्द्धतेभवान्।राजा।आर्यप्रसादएषचंद्रगुप्तेनानुभूयते।प्रविश्यपुरुषः।जअदु२
अज्जो।अज्जएसोक्खुभद्दभडभागुरायणप्पमुहेहिंसंजमिअमलअकेदूपडिहारभूमिमुवत्थावि
दो।एदंसुणिअअज्जोपमाणं।चाण०।भद्रनिवेद्यताममात्यराक्षसाय।अयमिदानींराजकार्यंकरिष्य
ति।राक्ष०।स्वगतं।कथंदासीकृत्येदानींविज्ञापनायमांमुखरीकरोतिकौटिल्यः।कागतिः।प्रकाशं।राज
न्चंद्रगुप्तविदितमेवतेयथावयंमलयकेतौकिंचित्कालांतरमुषिताइति।तत्परिरक्ष्यतामस्यप्राणा॥

राजा।चाणक्यमुखमवलोकयति।चाण०वृषल प्रतिमानयितव्योयममात्यराक्षसस्य प्रथमः प्रणयः।
पुरुषमवलोक्य।सद्भ्रमद्वचनादुच्यतां भद्रभट प्रभृतयः।अमात्यराक्षसविज्ञापितो देवश्चंद्रगुप्तः प्र
यच्छति मलयकेतवे पुनः पैत्र्यमेव विषयं।अतो गच्छंतु भवंतः सहानेन।प्रतिष्ठिते चास्मिन्पुनरागंतव्यं।
पुरुषः।जं अज्जो आणवेदि।चाण०तिष्ठ तावत्।भद्र २ इदमपरमुच्यतां विजयपालो दुर्गपालः।अमात्य
राक्षसस्य प्रिय देवश्चंद्रगुप्तः समाज्ञापयति।एष तावच्छ्रेष्ठी चंदनदासः पृथिव्यां सर्वेषु नगरेषु श्रेष्ठिप
दमारोप्यतां।पुरुषः।जं अज्जो आणवेदि इति निष्क्रांतः।चाण०चंद्रगुप्त किं ते भूयः प्रियमुपकरोमि।रा
जा।किमतः परमपि प्रियमस्ति।राक्षसेन समं मैत्री राज्ये चारोपिता वयं।नंदाश्चोन्मूलिताः सर्वे किं क
र्तव्यमतः परं॥ईथ।चाण०विजये उच्यतां दुर्गपालो विजयपालः।अमात्यराक्षसप्रीतो देवश्चंद्रगु

148

त्तः समाज्ञापयति विनाऽश्वहस्तिभिः क्रियतां सर्वबंधमोक्षः ॥ अथवाऽमात्यराक्षसे नेतरि किं हस्ति
भिः प्रयोजनं ॥ तदिदानीं ॥ विनावाहनयुग्याभ्यां मुच्यतां सर्वबंधनं ॥ पूर्णप्रतिज्ञेन मया केवलं बध्य
ते शिखा ॥७०॥ प्रतीहारी ॥ जं अज्जो आणवेदि इति निष्क्रांतः ॥ चाण० ॥ अमात्यराक्षस तदुच्यतां किं ते
भूयः प्रियमुपकरोमि ॥ राक्ष० ॥ अतःपरमपि चंदनदासमोक्षादन्यत्प्रियतममस्ति । यदि परितोषस्त
स्मादिदमस्तु भरतवाक्यं ॥ वाराहीमात्मयोनेस्तनुमतनुबलामास्थितस्यानुरूपां यस्य प्राग्दंतको
टिं प्रलयपरिगता शिश्रिये भूतधात्री ॥ म्लेच्छैरुद्वेज्यमाना भुजयुगमधुना साश्रिता राजमूर्तेः स
श्रीमद्बंधुभृत्यश्चिरमवतु महीं पार्थिवोरंतिवर्मा ॥७१॥ ॥ इति निष्क्रांताः सर्वे सप्तमोंकः ॥ छ ॥ ॥
॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥

K K S U LIBRARY
RAMTEK
441 106
M-1761
Dist. Nagpur

```
[OrderDescription]
,CREATED=18.09.20 16:26
,TRANSFERRED=2020/09/18 at 16:44:30
,PAGES=149
,TYPE=STD
,NAME=S0003631
,Book Name=M-1752-MUDRA RACHHASAM
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
```

```
FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
```

```
FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
```

```
FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF
```

```
FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF
```

```
FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
,FILE145=00000145.TIF
,FILE146=00000146.TIF
,FILE147=00000147.TIF
,FILE148=00000148.TIF
,FILE149=00000149.TIF
,
```